दनुपस्थितेरेवन्याय्यत्वात् इति एवं चाक्षैरक्ष्यन्तीति प्रयोगमूलं तदुपपादकं कर्म्मकालेऽसादिद्वितीयेति संतं मूलं तथा कैयटप्रकाशरत्नाकरयुक्तं
च चिंत्यं किं च कृतिति चेति सूत्रकैयटोक्तरीत्या प्रयोदेऽपि प्रधानानुरोधेन गुणानां स्वात्मभेदकल्पनस्य तुल्यतया विशिष्य कर्म्मकालपक्षे इत्युक्तिरनु
चिता· किं च कार्यकालपक्षे· पादिप्रपरैवमगत्यसंज्ञेसदसोमादिति सूत्रभाष्योक्तरीत्या अपादानमुत्तराणि गां दोग्धीत्याकडारसूत्रस्थभाष्या
संगतेः आकडारस्यास्य हानं प्रयोदेशात्मवेति तदुक्तसंगतिरेव· तदेतदुक्तिदिविधामासानीयतीयसोपपतिं सिद्धांतमतेनाहाशानिति· लक्षणेति·
द्रमुपलक्षणं फलाश्रयत्वसमानाधिकरणकरणकर्म्मत्वविवक्षायामपि· न भवतीति अप्यवसेये स्थः उक्ते तेनासिति शेषः तथा चात्र विप्रतिषेधशा
स्त्रबलात् तीयेव शक्तिद्वयबोधिकास्तत्फलं तत्कर्म्मवत्· अन्येभाष्यायनुयायिनः नतु एकैव शक्तिः सत्ताद्वयोपयोगिनीति मूलं तथा कैयटप्रकाशरत्ना
करे दृष्ट्या युक्तं च चिंत्यं कर्म्मादिपदानां कर्म्मत्वादि तत्तच्छक्तिरूपेण बोधकतया तन्मेदस्यैवोचितत्वात् एवं च सर्वे साधारणं कर्म्मत्वं कर्म्मताशक्तिम रम०
त्वं धातर्नामक्रमं क्रत्वमपि कर्म्मत्वशक्तिमद्योनप्यर्थकत्वमिति मंजूषायां विस्तरः तस्मात्· द्विधात्वयैति· तथा च तस्याः संज्ञयोः समावेशार्थ
चेन शक्तिद्वययोगाबोध्यतेनचेवं कर्म्मणि लेकरणत्वशक्तेरनुक्तत्वेन तृतीयापत्तिरिति वाच्यं अपादानमुत्तराणि स्यस्थलद्वये गां दोग्धीत्यादौ त

३५

त्र कर्म्मणि लिपं च म्यापत्तिवारणाय एव द्व्यगतानेकशक्तिमध्ये एकस्यास्त्रभिहितत्वे परस्याभ्यपि तद्रूपकार्याङ्गीकारेणाक्षतेरिति भावः एत
न करणत्वं चात्र द्विधात्वयैसाधकतत्वं तद्वचात्र कर्म्मत्वं तथा च कर्म्मणि करणे वा प्रत्यये द्विधात्वयैसाधकत्वमुक्तमेवेति मान्योक्तं प्राचाम
नुरोधेनेति ध्वनितं· यत्तु प्रधानत्वं मुख्यत्वमरुणाधिकरणोऽधमेः अत्र न गरे ऽयप्रधानमित्यादिवत्तदभावरूपं वाप्रधानत्वं तृतीयावाच्यमिति तन्न राज्ञा
सह सेनागच्छतीत्यादौ तृतीयानापत्तेस्तदध्वनयनात् हात्रेति तत्रेदं लक्ष्यं· गुणसमूहाद्यमिति पदं तत्सुक्तानुरोधेन तत्रान्तरस्थद्वयादि
क्रमसुक्तं यद्गुणायेसुक्तं आदिनाद्यक्रियेयोः संग्रहः· एवं च मूले क्रियापदं प्रकृताभिप्रायं· पुत्रेण सह पितुर्गौः पुत्रेण सहस्थूल इति तत्र
क्ष्य· एतेन पुत्रेण सहागत इत्यादौ सहार्थसामर्थ्यात्प्रतीयमानक्रियाकर्तृत्वेन पुत्रात्तृतीयासिद्धावनचकेनाभिधानं इतरसमभिव्याहारं
विनापि प्रतीयमानस्य सहत्यस्यार्थक्रियाकर्तुरेव तेनाभिधानात्· वं पुत्रेण सहागमनं पितुरित्यादावुक्तरीत्या प्रतीयमानक्रियाकर्तुः स्याधेन्यपि
नेः कर्तृकर्मणोरेव षष्ठीनवतत्प्रतीयमाननन्तदन्वयिनो रितिनदोष इत्यपास्तं· उक्तलक्ष्यस्य सिद्ध्यस्य तत्राव्यापकत्वात्· उक्ते षा गमनादि
भिः पितुः शाब्दः पुत्रस्य सहार्थबलात्प्रतीयमानैस्तैः संबंधाद्यार्थः इतरसंबंधं विना प्रतीयमानत्वं बाधेस्य शाब्दत्वं सहार्थश्च साहित्यं त
च स्वसमभिव्याहृतक्रियादिसमानकालिकक्रियादिमत्वं तत्समनियतमरुणोपाधिरूपं वा· न तीयायार्थश्च क्रियासमभिव्याहारे सहा

८

पं१

भा·प्र· थेबलात्प्रतीयमानतत्क्रियाकर्तृत्वादिकमेव· द्रव्यगुणसमभिव्याहारेतद्बलात्प्रतीयमानस्तत्सहार्थसंबंधएव· एवंचपुत्रकर्तृकागमनसमा
नकालिकागमनत्वान्पितापुत्रस्वामिकत्वसमानकालिकपितृस्वामिकत्ववती गोः पुत्रवृत्तिस्थौल्यसमानकालिकस्थौल्यवानित्यादिक्रमेणबो
धः पुत्रकर्तृकागमनसहितागमनवानित्यादिक्रमेणवाबोधः पुत्रादेः सहार्थयोगस्यागमनादिद्वारकएवबोध्यः क्वचित्समानदेशक्रियावत्वरूपंत
त्समनियतंवातदर्थः यथामाषवापोत्तरंतत्रैवक्षेत्रेतिलवापेतिलैः सहमाषान्वपतिस्मेतिभवतीत्यादिस्वरूपंभाष्ये· तदेतद्द्विधापार्थत्वमुपपा
दयतिपुत्रेति· गुणक्रियाद्रव्यैर्गुणप्रधानभावेनद्वयोः संबंधेसाहित्यवाचिसहशब्दप्रयोगादितिभावः· बोध्येइति· शाब्दप्राथमिकेइत्यर्थः· तत्रसाहित्यंपु
त्रसंबंध्यन्वयितरूपंतत्समनियतंवातदभिप्रेत्याह· साहित्यस्येति· पुत्रेणेतिसहेतिशेषः इतीत्यस्येतद्बलादेवेतिशेषः· तस्यापिपुत्रस्यापि· सचपुत्रो
प्यागतइत्याकारकइतिभावः· नन्वेवंपित्रासहागतः सुतइत्यादिनस्यादतआह· शब्दत्वेचेति· तथाचसहागतौपितापुत्रावित्याद्यपिसिद्धंयद्वाक्रि
यादिसंबंधाविशेषात्कथंपितुःप्राधान्यंकथंवेदमप्राधान्यस्यैवग्रहणमतआहशब्दत्वेचेतिएवमितिः पोषिकतत्संबंधाधीकारेचेत्यर्थः· शुबुद्धि २२०
स्थेषुगुणादिघटितप्रागुक्तत्वस्वेषु· विशेषणेति· गुणाद्यन्वयितरूपविशेष्यस्यसत्वादितिभावः· उत्कर्षसाऽवश्यकस्यापिसूत्रेसर्वथानत्वं
ध्वनयितुमाहसहैवेति· विद्यमानतावाचीति· सकर्मकइत्यादौतुविद्यमानवाचिसहशब्देनानेकमितिबहुव्रीहौकप्रत्ययलक्षणदायुक्तस्तत्साधनप्रका

३६

रस्तुभाष्यविरुद्धइतिस्फुटीभविष्यति· योगेत्वितिपाठः· विशेष्याभावकृतोपीत्यर्थः· क्वचित्तथैवपाठः· अपितोभयाभावकृतपरिग्रहः· वस्तुतस्तु
शब्दत्वाभावस्याप्येतन्मूलकत्वादपरहितएवपाठोऽर्थश्चेयुक्तइतिध्येयमित्यर्थइति· एवंचसूत्रेसर्वोपिसहशब्दोऽप्रत्युतेविनिगमनाविर
हादितिभावः· येन्तुसहलादावत्रविद्यमानत्वविशिष्टधर्मोऽत्रसहार्थइतितन्नपुत्रेणेतितृतीयायाउपपदविभक्तित्वेनषष्ठ्यपवादत्वात्संबंध
मात्रार्थकत्वेनसाहार्थइतितन्नपुत्रेणेतितृतीयायाउपपदविभक्तित्वेनषष्ठ्यपवादत्वात्संबंधमात्रार्थकत्वेनसाहार्थेनानन्वयापत्तेः· वि
द्यमानैः पुत्रैर्युक्तेसत्यर्थेतुकर्तृकदर्शनान्येतत्तृतीयमेवसिद्धंपुत्रेणसहयः सयुतइत्यादौवैशिष्ट्यादिरूपसाहित्यंसहार्थः पुत्रसाहित्यवान्यः
सयुतइतिबोधइतिदिक्· तदाहान्यत्रेति· उपात्तशास्त्रसंगत्याक्विसर्थः· वक्ष्यमाणदोषेणयथाश्रुतमूलासंगतेराह· प्राचीनैरिति· सोरदे
वादिभिरित्यर्थः· क्रियाकारकसंबंधोऽन्तरंगइतितन्निमित्ताविभक्तिरंतरंगाउपपदार्थेनतुयत्किंचित्क्रियाकारकभावमूलकसंबंधइतितन्नि
मित्तासाबहिरंगेतितदाशयः· इदमयुक्तंनमस्यतिदेवानित्यत्रनमःपदार्थेपिक्रियाकारकभावेनैवान्वयेनतत्रचतुर्थीवारणासंभवान्नमोव
रिवइतिसूत्रभाष्येऽस्योपन्यासस्यासंगत्यापत्तेः· अत्रचनमःपदार्थस्यापिक्रियात्वंमुख्यतोमुख्यस्यैवातआह· वस्तुतइति· तदितिउपपद
विभक्तेरितिप्रसिद्धवाक्यमित्यर्थः· एवंनोक्तव्याहृतिः· अतएवसत्येसमपेक्षमाणेऽधिकरणसप्तम्यावलवत्वमनेनन्यायेनतत्रचदीयतइत्य

भा.प्र. न भाष्ये ध्वनितं कैयटेन स्पष्टमुक्तं · एतेन क्रियान्वयित्वमत्र कारकत्वमित्यपास्तं · सत्सप्तम्या अपि तदन्वयित्वादिति भावः · एवं तर्हि मूलासंगति
रत आहांतरंगत्वमिति · तन्न्यायेपेति · तन्न्यायस्यैवोपेत्यर्थः · तथा च यथाश्रुतं मूलं तथाप्युक्तं च चिंत्यमेवेति भावः · नन्वेवमपि न प्रकृते
इष्टसिद्धिः प्रथमायाः कारकाधिकारापठितत्वेनाकारकत्वात्तत्राह · प्रथमायाश्चेति · चस्त्वर्थो भिन्नक्रमः · एतन्न्यायप्रसंगेनैवेति शेषः · अय
भावः · क्रियाजनकार्थकविभक्तित्वं कारकविभक्तित्वं तच्च प्रथमाया अप्यस्तीति सापि तद्विभक्तिः ध्वनितं चेदं प्रकृतसूत्रभाष्यादौ इति तदाहान्यत्रेति ·
उपपदतादाविवेत्यर्थः · ननु सति संभवे वचनापेक्षया तरंगन्यायेनेष्टसिद्धिरेवोचितेति यथाश्रुतं मूलं स्वरसमेवात आहांतरंगत्वात्विति · अप्रधान
ग्रहणाभावे स्वविषये षष्ठ्या इव प्रथमाया अप्यवकाशस्याभावाद्विशेषविहितापेक्षयाह नांतरेति · एवं चेष्टासिध्यर्थं प्राधान्यग्रहणावश्यकत्वेन
तेन तेनैतद्वचनमनुचितं · वचनस्य तु तेनेष्टसिध्यात् उचितमित्याहोपपदेति · च स्त्वर्थे · सर्वेतः अपवादादपि प्रबलत्वं · ततमेव एवं च प्रधाने प्रा स्म०
प्ता प्रधाने एव सिध्यात् तं वचनं युक्तमिति भावः · इदं चांतरंगत्वमभ्युपेत्योक्तं वस्तुतः सदेव नेत्याह · किंचेत्यपीति · पदांतरेति · तदर्थस्येत्यर्थः · एवं च तु
ल्यनिमित्तकत्वादनैमित्तिकत्वरूपमल्पनिमित्तकत्वरूपं वांतरंगत्वं तत्र बाधितं तदाह · नत्वमिति · अंतरंगत्वमित्यर्थः · प्राचीनोक्तरीत्या तत्वसंभ
वेशांकृते · नचेति · संबंधस्येति उपपदार्थेन सहेति शेषः · क्रियेति · यत्किंचित्क्रियेत्यर्थः · तत्प्रयुक्तमुपपदार्थसंबंधप्रयुक्तं तत विभक्तिरूपं · एतेन तु

ल्ययुक्तत्वात् क्रियाकारकभावसंबंधस्यांतरंगत्वेन तत्प्रयुक्तकार्यं तद्विभक्तिरूपं मंतरंगमिति सूचितं · तथा सप्तम्या हि समाह · पुत्रेणेति · अपितत्र सपि
तस्मुच्चायकः तृतीयेति · उपपदतृतीयेत्यर्थः · सति संभवे कर्त्रादितृतीयात् करीत्या सिद्धेर्वसत्वेंतु द्रष्टव्यादियोगे सावकाशामित्युक्तमेवेति भावः · एक
क्रियेति · यत्क्रियाकर्तृत्वं पितुस्तत्क्रियेत्यर्थः · तथा चांतरंगत्वात्तत्रापि प्रथमा स्यादिति भावः · यद्युक्तभाष्यासंगतेश्चेत्यपि बोध्यं · अन्ये तु प्रधानीभूतक्रि
यां हेतुककार्यत्वेन कारकविभक्तीनां प्राबल्यमिति न्यायमाश्रित्यैवं दृतिर्निमातेरवद्रयति · क्रियाया इति · यद्यप्यत्र पक्षे तत्र चरी ये ते न मो वा रिव इति सूत्रद्वय
स्य प्रागुक्तभाष्यासंगतिरुभयोरपि क्रियासंबंधनिमित्तकत्वादिति दोषः स्पष्टस्तथापि मूले एवं कुतरमा हाप्रधानेति उक्तमिदमनुपदं · नदेवेति ·
उक्तार्थरूपमेवेत्यर्थः · नत्वन्यार्थरूपं तथा सत्यादिपदं न वदेत् संशयात्स्यत्वाभावात् · अन्यस्येत तुल्यत्वात् · एतेन भेदेन समाधानं ब्रुवतो मूलकृतः प्रथमा
याः कारकविभक्तित्वेनेष्टमित्यपास्तं तदाहान्यत्रेति · उक्तवाक्ये इत्यर्थः · एतेन पुत्रेण सह पितुरागमनमित्यादौ पितुस्तद्भावायेन तदावश्यकमन्यथा
परामपितं बाधित्वा विशेषविहितत्वात् तृतीयैव स्यादिति प्राचोक्तमपास्तं वचनेनैतस्योः प्राबल्यात् · गुणादियोगे स्य सावकाशत्वात् · एतेनास्ति
भेवतीपर इति भाष्योक्तेस्तत्राप्यस्तिक्रियाकर्तृत्वेनेदं प्रथमोपपदार्थ संस्कारापशास्त्र एवसंबंधेत्वानत्वाथे इति भूषणेत्वाह आगतेत्यत्रा
पि तुल्यत्वात् तन्नावश्यकत्वादाक्षेपसमाधाने निष्फले इति रत्नाकरोक्तमपास्तं · द्रव्ययोगे तथाप्यनिर्वाहात् · एतेन तत्रैव गवोभयोस्तुल्ययोगा

सिद्धस्तदभावेपतत्स्यावश्यकमित्यपास्तं·षष्ठीवद्विशेषणेदेवेतदंगीकारात्पितुस्तत्संबंधस्यांतरंगत्वाच्चेतिदिक्·तदाहेसत्वमिति·मूलेहेत्वनुक्तेरा
ह·व्याख्यानादिति·अंगग्रहणसामर्थ्यमूलकात्अंगशब्दोपसमुदायशब्दइतिभाष्योक्तादित्यर्थः·एतदेवध्वनयितुमाहान्यथेति·अजंतत्वाभावे
इत्यर्थः·अंगशब्दस्यावयवेप्रसिद्धत्वादितिभावः·गुणेनेति·अनेनयेनगुणेनगुणिनोविकारोलक्ष्यतइत्येतावतैवसिद्धेतद्वैयर्थ्यस्पष्टमेवे
तिध्वनितं·वपवस्य·अक्ष्णाःलक्ष्यतइत्यग्रेतनमन्यस्ततोमेतिशेषः·इत्यादौत्विति·अक्षिशब्दादित्यशेषः·अजंतस्यापिपलिंचिन्हकत्वादाहाशे
आपद्यतीति·पदप्रत्ययेवकाणंतयाप्यवयवधर्मस्यसमुदायेआरोपाद्यथाशरीरेप्रयोगस्तथातदछिन्नेपिव्यवहारस्यनिरूढत्वादाह·शरीरस्ये
त्यवेति·विकारसंभवस्यासत्वाद्यत्वादाह·लक्ष्यइति·अत्रेदंबोध्यं·द्वेविप्राविति वदक्ष्णेतिप्रयोगः·एवंरीत्यादर्शनात्साधुत्वेचेदमेवभाष्यंमानंचक्षु
र्नाशवान्सचक्षुकःकाणपदार्थः·अक्षिपदार्थोगोलकंविकारप्रयुक्तत्वरूपःसंबंधस्तृतीयार्थः·गोलकविकारप्रयुक्तचक्षुर्नाशवान्सचक्षुकइति
बोधइतिकेचित्·अतिशायनेइतिसूत्रभाष्यक्षेपटाभ्यांतुसर्वथादृष्टिहीनःकाणइतिलभ्यतेइतिबोध्यं इतिनुस्सूत्रेलोक्तिकहेतोर्ग्रहणेपिप्र
त्यकरणत्वादेवसिद्धमतआह·इत्यादौनेति·तद्व्याचष्टेआदिनेति·नफलितमाहेवंचेतिनमोत्सेनयग्रहणेवेत्यर्थः·साधारणमिति·तज्जनकेवर्तते राम॰
इत्यर्थः·ननुकरणंनियतक्रियमित्यनेनबहुव्रीहिणसव्यापारंतदित्यर्थोलभ्यतेसचायुक्तः·अनाश्रितेइत्यनेनयोनरुत्कापनेरतआह·क्रियमेति·

३८

तथाचैवेषयिकसप्तम्यर्थेबहुव्रीहिस्तइध्वनयन्नाहक्रियामात्रेति·बहुव्रीहिःतस्मात्जनकमित्यर्थः·उक्तयुक्त्याभिदसिद्धायजनपकारिकापोवैयर्थ्यमाशं
क्याह·हेत्विति·वैयर्थ्यांतरमिति·एतेनक्रियाजनकेकरणेप्यनेनैवसिद्धेतत्रतृतीयार्थ्यर्थोअतआरेत्यवतरणंनिरस्तं·तद्ध्वनयन्नाह·फलितमाहे
वंचेतिकरणंतुव्यापारवदेवेत्यादिभेदेचेत्यर्थः·शाब्देति·शाब्दबोधवैलक्षण्यापेत्यर्थः·करणत्वशक्तितोहेतुत्वशक्तिर्भिन्नैवात्रतृतीयार्थेइतिनात्यये
ननुतुल्यार्थोत्सुविकल्पेरन्निति·मिनुक्तेव्रीहिभवोदेहृदितानुदितयोश्चविकल्पव्यवहारोदृष्टः·प्रकृतेतुनैवमितिकथंतद्युक्तिः·अन्यथाद्वितीयादेर
पिमिथस्तद्व्यवहारापत्तिरतआह·तदर्थत्वेनेतिताद्रर्थ्येनेत्यर्थः·तयोस्तृतीयाचतुर्थ्योः·एवंचेनसोऽत्रविकल्पःकिंतुविकल्पेतेइत्यस्यपक्षेभवतोस
र्थइतिभावः·फलमपीहहेतुरितिपरमम्वत्वमित्युक्तेचिद्व्याचष्टे·इहसूत्रेफलमपिहेतुशब्देनगृह्यतेतुततृतीयार्थेश्चफलत्वेनफलंतत्रप्रकृत्यर्थे
त्याभेदेभान्वयः·तस्यचवासेजनकतयारवयोऽध्ययनाभिन्नफलजनकोवासइतिबोधइतितदाह·तच्चफलमिति·सूत्रेतेनग्रहसमाणफलंचेत्यर्थः
अन्येतुअन्यथातथाइहएतस्सूत्रलक्ष्येकचित्फलमपिहेतुत्वेनविवक्ष्यतेतस्यापिस्वज्ञानद्वाराजनकत्वात्इतितदाह·हेतुत्वेनैवेइति·एवस्तद्या
हृतिद्वाराःस्पसिद्धांतत्वसूचनाय·अतएवात्रमतेबोधमाहाध्ययनेनेति·अध्ययनाभिन्नहेतुजन्योवासइत्यर्थः·तमीयायामितिसनेनेसंसर्गइत्यं
तोमंयोव्याख्यातइतिसूचितं·अतएवतदग्रिमग्रंथंव्याचष्टे·चतुर्थ्यामिति·उपकारकत्वंतदर्थः·तत्रचतेनान्वयः·अध्ययनतिष्ठोपकार्येनान्वयःपितो

पकारकत्ववान्वासइत्यर्थः· इदं निरूपकत्वस्य संसर्गत्वकथनद्वारा विशेषकथंत्वासिद्धांतमतमाहाध्यपेति· उपकार्योपकारकभावस्तदर्थः· अध्ययनरूपंप
दुपकार्यंतदुपकारकोवासइत्यर्थस्तदाह· तत्रार्थेति· चतुर्थ्यंतेपीत्यर्थः· अपिस्तीयांतसमुच्चायकः· एवंचाविशेषइतिमूलोक्तिस्तथादंड्याद्युक्तिश्चचिं
त्येतिबोध्यं· भेदेति· विशेष्यविशेषणेत्यर्थः· एवः पूर्ववत्· नन्वत्वंश्रमेणेत्यादौक्रियावाचकपदाभावात्कथंकरणत्वंतां विगापितदंगीकारेतुक्रिया
जनकत्वात्क्रियामात्रान्वयितदित्यनुपपन्नमतआह· गम्यमानेतीति· अलंशब्दोनिषेधार्थः यद्यपिसाध्यमित्यर्थोध्याहारेणतस्यनामार्थत्वेनद्रव्य
त्वात्क्रियात्वेपितत्प्रकृतिभागार्थस्यतत्वंतथाचगम्यमानेत्यस्यमानसबोधविषयइत्यर्थः स्पष्टंचेदंसहयुक्तेइत्यत्रभाष्यइतिमूलाद्यभिमतंतथापि
सिद्धांतरीत्याव्याचष्टे· श्रमेणेत्यादीति· वाक्यैकदेशन्यायेनेतिभावः· आदिनाशतादिपरिग्रहः· अस्यसिद्धांतत्वंध्वनयति· स्पष्टंचेदमिग्यणइत्यत्रभा
ष्यइतिमूलाद्यभिमतंतथापिसिद्धांतरीत्याव्याचष्टे· श्रमेणेत्यादीति· वाक्यैकदेशन्यायेनेतिभावः· आदिनाशतादिपरिग्रहः· अस्यसिद्धांतत्वंध्वनय
ति· स्पष्टंचेदमिग्यणइत्यत्रभाष्यइति· तत्रहिप्रविशपिंडीमितिवाक्यार्थेवाक्यैकदेशप्रयोगइतिह्युक्तं· तथाचविशिष्टस्यैवशक्तिग्रहएकदेशस्यापी
तिस्वधात्वक्रियांप्रतिस्वकरणत्वमितीहेत्यादिपरममूलार्थोबोध्यः एतेनतस्यश्रमेणेतिनामार्थत्वेननक्रियात्वमित्यपास्तमितिमंजूषायांविस्तरः· रम॰
तदाहेतिताद्दशगम्यमानत्वमभिप्रेत्यैवाहेत्यर्थः नत्वन्यथाभिप्रेत्येतिभावः· ननुएवमपिश्रूयमाणतद्वाचकपदजबोधविषयत्वसत्त्वादिदोषः· तआ

३९ २

ह· श्रूयमाणस्वमात्रेति· तथाचातस्यतन्मात्रावाचकपदजबोधइतिभावः ज्ञापकत्वमुपपादयति· चतुर्थ्येर्थेति· यतुरत्नाकराद्यः इदंचिंत्यंअशि
ष्टव्यवहारेइत्यंशस्यवाचनिकत्वादितितत्खंडयति· सावेदिति· यद्यर्थेकथेप्रवृत्त्वादितिभावः· तस्यास्तृतीयायाः ततस्तदर्थस्यस्पष्टमप्रतीतेराह· ज्ञा
प्यतेइति· एतेननिपातानामनेकार्थत्वाच्चार्थेचेतशब्दः· तादृशाद्दाणआत्मनेपदंभवतिसाचचतुर्थ्यर्थेबोध्याभिधानस्याभावाच्चाशिष्टव्यवहारेएव
प्रयोगनियमइतिहरदत्तोक्तंप्रकाशान्तरदितमपास्तं· एकदेशानुमतिद्वाराः यमप्यंशोज्ञाप्यतइतिभाष्याक्तिरपिप्राचामनुरोधेनेतिबोध्यं· त
दाहतेनेति· उक्तप्रकारेणेत्यर्थः· शिष्टेति· अशिष्टानांसंकीर्णेचाराणांयोव्यवहारः· क्रियातद्बोधकप्रयोगेप्रत्यासत्यापत्संबंधेनव्यवहारस्य
संकीर्णाचारत्वंघोद्बाचकोतदर्थस्येतिवार्त्तिकार्थः· अपिरुक्तसमुच्चायकः· दानपूर्वकोभोगोधात्वर्थः· दासीसंप्रदानकदानपूर्वकोभोगइतिबोधः
दास्यैदत्वातामुपभुंक्तेइतिभाव्· इतितृतीया· ननुस्वत्वनिवृत्तेधात्वर्थत्वेनतदप्रसक्त्याःपुनर्ग्रहणायेत्यधिकमतएवदानंचनामकंचिदुदिश्यापुनर्ग्रहणा
यस्वद्रव्यत्यागइत्येवप्रकाशेउक्तमतआरेहंदचेति· प्रतीकोक्तार्थरूपंचेत्यर्थः· वाच्यता· दाणधातुवाच्यता· ननुभाक्तोनामगौणः तथैवतात्रिकव्यवहारा
त्सचकुत्रेत्याशंकायामाहाधीनीकरणेति· एवमपिवृत्तिकृन्मतमित्यंतंमूलंतथातदुक्तंचायुक्तमेवतमृदायेत्यापेत्यावनिर्वाहात्ततद्दृध्वनय
त्राह· नश्रद्धायेतिमुख्यमतेरुक्तरूपदानासंभवादाह· तज्जनकमितिविशदिरूपमित्यर्थः· तथापितदसंभवादाह· नोयेति· उपदेशोबोधनं· तत्रमु

स्वंप्रमाणमाहात एवेति। अन्वयेत्वानाग्रहादेवेत्यर्थः। क्रियेति। कर्मरहितक्रियेत्यर्थः। एवंच पत्ये शेते इत्यादावकर्मकक्रियोद्देश्यस्य संप्रदानत्वार्थं वार्ति
कमिति भावः। प्रत्याख्यातमिति। संदर्शनादिक्रियया शपनादिक्रियाया अपि कृत्रिमकर्मत्वात्। तथा च पतिसंप्रदानकं दर्शनादिकर्मीभूतं पत्नीकर्तृ
कं शपनमिति बोध इति सूत्रेणैव तत्त्वसिद्धिः। अन्वये त्वेतु तदेसंगतिः स्पष्टैवेति भावः। एवं सत्यकथितमप्रिमसूत्रं योजयति। भाष्यांतरमिति। तद्व्याचष्टे। चपे
टामिति। प्रस्तुतकरणत्वमित्यर्थः। संयोग इति। संयोग इति। संयोगविशेषानुकूलो व्यापार इत्यर्थः। अर्थः इति दाण इति भावः। अस्यान्यथाप्युपपत्ते नौस्य
मुख्यामानत्वमिति तात्पर्यं शेषित्वं प्रधानत्वं तत्फलितमाहोद्देश्यत्वमिति। अतएवाह। शेषत्वमपेति। कर्मणा करणभूतेन यं तं स्वामिभावादिना संबंधु
मिच्छतीति तद्ध्यादिति भावः। अतिशयस्यादिजनकत्वं संस्कारः। यद्यपि शेषित्वमपि। बाधात् संप्रदानसंज्ञा प्राप्ता इति शेषस्तदाह। नदोष इति न तदाप
त्तिरित्यर्थः। तथा च मूलं तथा तदुक्तं च विसंगच्छते इत्याह। तत्वमिति। अत्रेदं बोध्यं संप्रदानत्वशक्तिमान् क्रियाकारकभावसंबंधश्च कारकचतुर्थ्यर्थः। सा च शक्तिस्त
त्त्वद्वाक्ये कर्मनिष्ठफलनिरूपकत्वेनेच्छाविषयोपस्थितिष्ठाउक्तसूत्रात् स एवोद्देश्य इत्युच्यते स्वत्वस्तु उद्देश्यतानिरूपकत्वं संबंधः। विप्राभिन्नसंप्रदाननिष्ठोद्दे
श्यतानिरूपकं दानमिति बोध इति प्रांचः। संप्रदानत्वविप्रीयं विप्रसंप्रदानकं दानमिति बोध इति तत्त्वमिति। तयोभयत्र पाठ। दाह। कादेरिति। कश्चिदिति। रामः
अत्रारुचिवीजं तु तस्याकर्मकत्वेन कर्मणा इत्यसंभवः। जीवमान इति साहचर्यात्तत्वैचित्र्यमिति। ननु प्रीधातोरपि रुच्यर्थत्वेन हरि प्रीणयती त्यत्रापि तदाप

४०

त्तिरतआह। प्रीयमेति। अतएव संप्रदानत्वेमकर्मणि लडसंभवात्तदनुपपत्तेरिति भावः। क्त्वादि चुरादि उभयसंग्रहायाह। प्रीधात्वर्थेति। अत्र हरिमित्यत्र। अ
त्रमते ज्ञापनकल्पनागौरवमिति। इदं मूलं तथा रत्नाकरटंड्याद्युक्तं च विसंगत इच्छन्नपन्नाहेति भावः इति। अयं भावः। विषयतासंबंधावच्छिन्नप्रीत्यनुकूल
त्त्वस्यमानाधिकरणो व्यापारो रुचेरर्थः। तत्फलभूतप्रीतेः समवायेनाश्रयो हरिः संप्रदानत्वशक्तिमानुक्तसूत्रात्। प्रीतिव्यधिकरणो व्यापारो रुचेरर्थः।
तत्फलभूतप्रीतेः समवायेनाश्रयो हरिः संप्रदानत्वशक्तिमानुक्तसूत्रात्। प्रीतिव्यधिकरणः सोऽभिलषतेरर्थ इति तस्य तदर्थत्वाभावाद्धरिर्भक्तिम
भिलष्यतीत्यादौ न हरेस्तत्वं समवायसंबंधावच्छिन्नप्रीत्यनुकूलव्यापारः प्रीधातोरर्थः। अतएव प्रीयमाणः। हरिं प्रीणयतीत्यादिसिद्धिः। एतदभावेह
रेश्शेषषष्ठी प्राप्तेति तदपवादत्वमस्य। प्रकाशोपीत्यं हरिनिष्ठा या भक्तिविषया प्रीतिस्तदनुकूलो भक्तिनिष्ठो व्यापार इति बोध इति। एतेनात्रपक्षे क्रिय
याप्यमित्येव सिद्धमिति सूत्रं वैयर्थ्यापत्तिरिति रत्नाकरोक्तमपास्तं। तस्या अपि कारकविभक्तित्वेन तद्विवक्षायां दोषत्वेऽनेन विधानादिति दिक्। तदभावे प्री
यमाणपदाभावे। शेषत्वेति। क्रियाजनकत्वमात्रविवक्षायां संज्ञांतरप्राप्तिविषये इत्यर्थः। तथा अधिकरणसंज्ञया बाध एतत्प्रयोगस्याप्युपपत्तेरित्यर्थः।
अपिरुक्तप्रयोगसमुच्चायकः। यद्वा अपिः पक्षोक्तस्य समुच्चायकः। कर्मसंज्ञायामपि महत्यासत्त्रस्य निर्विषयतापत्तेरित्यर्थः। तत्सत्वे तस्य कर्मसंज्ञापवादत्वा
न्न दोष इति मूलतात्पर्ये सिद्धांतरीत्या तु प्राप्तिरेव नेति बोध्यं। सुखादिमात्रार्थत्वे कृष्णं श्लाघते इत्यादिप्रयोगानामिष्टत्वादाह। स्तुत्येति। तस्यार्थिकाबोधेनाधात्वर्थः

Dr BHAU DAJI

स्तुतिश्रकृष्णस्यैव। साक्षुगुणावलप्रतिपादकशब्दप्रयोगादि। स्मरादितिहेतौ पंचमी। परस्मैसखीजनाय। कृष्णं कथयामीति। आत्मानुरागं कृष्णं बोधयती
त्यर्थः। अत्र ज्ञापनवचनात् तृपेः सन्नंतात्कर्मणि शानच्। तेन च यद्विषयकज्ञानानुकूलव्यापारानुकूलव्यापारानुकूलव्यापारः सगर्भन्तेइति केचित्। तदा
शयमाह। तौ मेति। प्रथमोपस्थितत्वात्। अंतरंगत्वात्। तथाच गोपीकर्तृक सखीजनोद्देश्यक कृष्णस्तुतिपूर्वक स्वात्मानुरागकृष्णकर्मकं बोधनमितिबो
धः। अत्र पक्षे कर्मत्वं चतुर्थ्यर्थः। एवं तत्रणपक्षे कर्मनिरूपितः ननुज्ञीप्स्यमानपदेन तस्यैव ग्रहणमुचितमत आह। तस्यापीति। णिचः प्रकृत्यर्थकर्मणोपीत्यर्थः।
विशिष्टस्येच्छाविषयत्वे विशेषणस्यापि तत्त्वादितिभावः। अपि। श्लाघसमुच्चायकः। तत्र मते णिजनिष्फलः। जिज्ञास्यमानइत्येवमुवक्तव्यादत आहान्येत्विती
ति। तदुपपादयति। प्राधान्यादिति। एयर्थस्य प्राधान्यादित्यर्थः। एतेनतन्मतेकृत्यर्थकर्मणोपीत्यर्थः। विशिष्टस्येच्छाविषयत्वे विशेषणस्यापि तत्त्वादितिभावः।
अपि। श्लाघसमुच्चायकः। तत्र मते णिजनिष्फलः। जिज्ञास्यमानइत्येवमुवक्तव्यादत आहान्येत्विति। तदुपपादयति। प्राधान्यादिति। एयर्थस्य प्राधान्यादित्यर्थः।
एवंतन्मते कृत्यर्थकर्मनिरूपितत्वाशयः। अन्येत्विति मताशयः। अत्र पक्षेपि सएव धात्वर्थः। तथा च गोपिकर्तृकं स्मरहेतुकं कृष्णसंप्रदानकमात्मपरान्यतरस्तु रम०
तिविषयकं बोधनमिति वाच्योर्थः। आत्मनः परस्य वेति प्रकरणादीगम्यं। तदभिप्रेत्याह। तदेवाह कृष्णायेति। तथा च मूलोक्तः फलितार्थ इति भावः। ननु तत्र
पक्षे कर्मणाभ्यामिति संप्रदानत्वं सिद्धमत आह। णकारकशेषत्वादितीति। तद्व्याचष्टे। कर्मणेति। अनाप्या। व्यापिकर्मत्वेप्राप्तेइत्येव वाच्ये तत्वोक्तिरसंगते

तिभावः। एतेन कर्मत्वाविवक्षया तच्छेषत्वादिति मूलव्याख्यानमपास्तं। शेषत्वादिति कारके त्यादि। वस्तुतस्तत्र पक्षेणिजूमा फलेपि सत्वेनैवपर्ये ज्ञाप्यमानइत्येव
सिद्धेः। तस्मात्प्राधान्यात्स्वार्थस्याचोभयोरपि ग्रहणमिष्टं द्वितीयपक्षोक्त एवार्थः। आत्मपरान्यतरकर्मकस्तुत्या कृष्णं संसखीजनं तंबोधयतीति या
वत्। कर्मसंज्ञापवादत्वादुभयत्रापि कर्मत्वेप्राप्तेइदमेवमयेपीति बोध्यं। विस्तरस्तु घोतादेर्बोध्यः। अत एवारुचिसूचकमन्येत्वित्युक्तं मूले मूलोक्तार्थस्य शब्द
तत्त्वाभावादाहत त्वेति। तदर्थबोधकवाक्यइत्यर्थः। अग्रिमस्य श्लाघ्नत्वं सूचयितुं तमेवार्थमित्यस्योपपत्तिमाह। स्वाभीति। ह्नुत इत्यादि। मूले। व्याख्यातत्वादाह। एवंज्ञा
पत इति। ज्ञापयन्नेन कृष्णं स्वानुरागं बोधयतीत्यर्थ इतिभावः। अत्र प्रश्नाशादिग्रंथास्यपुष्काएवेति बोध्यं। ननुमत्रपरत्वात्कर्मत्वेकथमेतत्सिद्धिरत आह। स्पृहणीमेइति।
स्पृहणीयशब्दे इत्यर्थः। शेषषष्ठ्यपवादत्वात्संप्रदानत्वस्य शेषत्वविवक्षादुष्करेति मूलमतेनआह। कर्मणइति। शेषत्वविवक्षायामिति। विषयवादत्वात्संप्रदान
तस्य शेषत्वविवक्षादुष्करेति मूलमतेनआह। कर्मणइति। शेषत्वविवक्षायामिति। विषयवादत्वात्संप्रदानत्वस्य शेषत्वविवक्षायामित्यर्थः। गेग। एतन्मतेऽत्र
तदंतत्वे। स्पृहेरिच्छामात्रवाचीफलावच्छिन्नेच्छावाचीत्वस्थापेक्षेनसंप्रदानत्वमत्रतीप्सितत्वं धात्वर्थव्यापारजन्यफलाश्रयत्वं ननु फलस्य धात्वर्थत्वाग्रहः। अस्ते
कर्मत्वं तत्र धात्वर्थफलाश्रयस्येत्युक्तं शेषषष्ठ्यपवाद एतत्संप्रदानविभक्तिः पुष्पसंप्रदानिकेछेति तत्र बोधः। कर्मणइवसंप्रदानस्यापि तत्वमविवक्षायां षष्ठ्येवे
ति। तत्रविधायकाभावादाह। वाहृतिषष्ठ्यपवादत्वादिति। एतत्संप्रदानविभक्तेरिति शेषः। अभिमानइति स्वविचारः विस्तुतत्रापि क्रियासंबंधेप्सितमात्रविवक्षा

संभवइति·एतेनपूर्वमतेक्रिययायमभित्यनेनैवसिद्धेसूत्रंव्यर्थं·एवंचोत्तरमात्रमेवयुक्तमतएवहरदत्तादीत्युक्तविवोधकंमूलेउक्तमितिरत्नाकरदंड्याद्युक्तम
पास्तं·तस्यासार्वत्रिकत्वात्‌अतएवघटंकरोतीत्यादौनदोषः·इदमपिसूत्रंतत्रज्ञापकं·तस्यप्रत्याख्यानाच्च·विषयतयाक्रियाजनकत्वमात्रविवक्षायामे
तत्सूत्रेऽस्यधात्वर्थंउपेक्षाविषयत्वाभावाच्चेतिदिक्‌·अमर्षस्यसाधारण्यादाह·वागिति·प्रस्फुटेति·अस्पष्टेत्यर्थः·अपकारस्यापितथात्वादाहापीति·अस्य
हतस्यासाधारण्यापितथात्वादाहोत्कर्षेति·गुणेष्वितितिविषयसप्तमीत्याह·गुणविषयेइति·शौचाचारादिगुणविषयेइत्यर्थः·दोषत्वारोपानुकूलइति·
दंभादिकृतत्वरूपदोषत्वारोपानुकूलइत्यर्थः·क्रोधजन्यस्येति·तादृशकोपरूपक्रोधजन्यस्येत्यर्थः·इदंतादृशद्रोहजन्यस्याप्युपलक्षणंफलस्यवेधदुः
खादेः·तस्यउक्तफलस्य·संज्ञांविनातदप्राप्तेराह·तत्प्रयोजीति·अत्रेदंबोध्यं·हरिसंप्रदानकःक्रोधोद्रोहइतिबोधः·हरिसंप्रदानकोत्कर्षविरोधीत्या
दिक्रमेणतत्रबोधः·हरक्रोधद्रोहाभ्यामिच्छाविषयत्वाभावात्क्रियमाणमित्यनेनतन्नसिद्धिः·एतेनतेनैवसिद्धेक्रुधद्रुहोर्ग्रहणंचिंत्यंभाष्येमतेनुसूत्रमेवेति
रत्नाकरदंड्याद्युक्तमपास्तं·नस्यकुपितः·कुप्यतीतिभाष्येणप्रदृष्टतादृशकोपस्यैवक्रोधत्वबोधेनेनकुपेरतदत्वेननतद्योगेइदं·कुप्यतिकस्मैचिदित्सा·प
साध्वेव·एतेनतदंगीकुर्वतांदीपरास्ताः·एतेचेतनविषयाएव·द्विषिस्तुचेतनविषयोपि·औषधंद्वेष्टीतिप्रयोगात्·अनभिनंदनेहितदर्थः·अतएवचिंतदो एम०
षाणामित्येवनोक्तं·तेनयोस्मान्द्वेष्टीत्यादौसाधनेति·प्रश्नविषयमेति·प्रश्नविषयशुभाशुभपर्यालोचनमित्यर्थः·पर्यालोचनमित्यर्थः·पर्यालोचनंचाज्ञा

५२

५

नमंगणानुकूलोव्यापारः·प्रश्नविषयस्यकर्मणोधात्वर्थेनोपसंग्रहादकर्मकावेतौ·अतएवश्यन्·एधोऽकर्मकादेवेत्युक्तेः·धात्वर्थैकदेशेप्रश्नविषयेकृष्ण
स्यान्वयः·कृष्णसंप्रदानकमथोत्कृष्णसंबंधिप्रश्नविषयशुभाशुभपर्यालोचनमितिबोधः·तत्रेति·तथार्थेसप्तमीत्यर्थः·प्राप्तिरिति·कृष्णस्येतिशेषः·ए
वंचकर्मत्वेप्राप्तेइदमितिवाच्यंनतुषष्ठींप्राप्तामितिभावः·तस्यप्रश्नविषयरूपफलस्य·प्रयोज्यत्वेनेति·साक्षात्परंपरयावाप्रधानीभूतप्र
कृतधात्वर्थव्यापारजन्यत्वेनेत्यर्थः·नहिशुभादिकंप्रयुक्ततादृशव्यापारजन्यमितिभावः·तदप्राप्तिरिति·कर्मत्वाप्राप्तिरित्यर्थः·होतरिस्वास्वात्फ
लाश्रयत्वाभावात्कर्मत्वप्राप्तिमुपपादयति·शंसितुरिति·शंसितुर्होतामत्कृते·कंपठ्सतशस्त्राख्यस्तुत्यादिनेंद्रादिनिष्ठगुणाभिधानंतद्वि
षयोपयत्तन्निष्ठस्तत्कर्मकइतियावत्·इदंशोर्योर्हर्षस्तदनुकूलोयोःऽध्वर्युनिष्ठोव्यापारःओथामोदएवेत्यादिशब्दाभिलापरूपस्तद्रूपंप्रत्याहतमि
त्यर्थः·तयोःअनुगृणातिप्रतिगृणातीः·अनेनानुप्रतीतिभिन्नेसूत्रेपदेइतिसूचितं·तदाह·शंसितुरिति·एवंचेति·मुख्यकर्मत्वस्यशंसितरिसत्वेनेत्य
र्थः·होतुरितिशेषः·ननुधिनोतेर्धनमितिशुसस्याभावात्कथमस्यापिधनेत्वात्प्रकाशानुवादेआदिपदंव्यर्थमतआहादिनेति·तथाचसुभिक्षेअन्न
ततदसंभवात्तेषांधनपदेनकांचनादेरेवमात्रत्वमितीदंसफलमितिभावः·उपकारकत्वंचानेकधेत्यस्यपदिजनकत्वमेवनकिंतुप्रकाशकत्वंसहायत्वंचेत्यपीत्य
र्थः·तदोत्तरग्रंथासंगतिरतआह·साक्षादिति·साक्षादित्यनेनपूर्वोक्तानांसंग्रहः·द्वितीयेफलंमूलोक्तमुपपादयति·ब्राह्मणायेति·तच्छब्दोब्राह्मणबो

धकोद् भ्रष्टतिदोषः एतेनसचनानाविधोनकार्यकारणभावएवतेनब्रह्मणायदधीतिसिद्धं तस्यद्ध्यनन्यत्वेपितत्संकार्यत्वात् इतिरत्नाकरदंड्याघुक्तमपास्तं·
वार्तिकेक्लृपीतिसप्तमीश्चर्षेयग्रहणंचात्रव्याख्यानात्संपन्निरुत्पत्तिः सेवक्लृप्तिः क्लृपसामर्थ्येधातुयोगेउत्पद्यमानेर्थेवर्त्तमानाच्चतुर्थीतितद्यो/द्विकारवाचका
च्चतुर्थीतिलब्धं·विकारेचप्रकृतिरूपारोपः प्रथमापवादोसोभक्तिरूपज्ञानकर्तृकोत्पत्तिरितिबोधः भक्तिरत्रनिदिध्यासनरूपा·नतुप्रसिद्धानस्याःसाक्षा
त्मुक्तिजनकज्ञानासाधकत्वात्·यद्वाकल्पतेइत्यादेः परिणामेनेमचतुर्थी/विधियतेएवंचात्रसफलाचतुर्थीतयोरभेदविषयेव्याप्यंभवत्यर्थककल्पियोगे
परत्वात्प्रथमयाबाध्यतेश्च तएवतत्रतयोरभेदान्वयः एतेनतादर्थ्यचतुर्थ्येवगतार्थमि· दमितिरत्नाकरदंड्याघुक्तमपास्तमितिबोध्यंएवंचयथाभक्ति
र्ज्ञानायेत्यत्रसाधमवतितथाभक्तिर्ज्ञानात्मनेत्यत्रापितत्रापज्ञोज्ञानात्मनेइतिस्यात्·आत्मशब्दस्यस्वरूपपरत्वेनविकृतिवाचकत्वादेवंचमत्त्वंतथाप्र
काशरत्नाकरदंड्याघुक्तंचह्विंत्यमतआहात्मेति·तद्वृत्तीतिज्ञानवृत्तीत्यर्थः एवंचेतितस्यज्ञानस्वपरत्वेचेत्यर्थः तस्य·ज्ञानात्मशब्दस्य·ज्ञानंविकारे
नतुज्ञानत्वमितिभावः तथासतितस्यवास्तवमर्थमाह·ज्ञानत्वेति·वेत्तिव्यंतत्तीयार्थ इतिभावः ननुरूपांतरप्राप्तिःकस्यार्थोऽतआह·रूपांतरेति
पंचमीपदेरूपांतरमेवपरिणामोनतत्प्राप्तिरितित्याशयेनबोधानमाह·भेक्ष्यपाशनेतितथाचप्रथमेवेतिद्वितीयंप्रतीकंबाधमितिबोध्यंननुहित रम॰
योगेएवसमासविधानस्यज्ञापकत्वेउत्तरग्रंथासंगतिरतआहचतुर्थीति·इष्टसाधनंहितपदार्थः संबंधश्चतुर्थ्यर्थः तत्संबंधीष्टसाधनमित्यादिबो

दिबोधः एतेनतादर्थ्येचतुर्थ्येवेदंगतार्थमितिरत्नाकरोक्तमपास्तं·यत्तुहरदत्तः चतुर्थीचाशिषीतिसूत्रविहिताशीरर्थेचतुर्थ्याःसमासविधिसाकल्यान्नतज्ञाप
कमितितत्संइयति·हृत्ताविति·हितेसुखपलक्षणात्सुखस्यापि·तत्रतत्प्रतीतिमुपपादयति·आशीरर्थेति·तदर्थेकभद्रायादिस्यादियोगेइत्यर्थः·विषयस्यहि
ताटः·आश्रयस्याब्राह्मणादेः·नचेति·नहीत्यर्थः तथान्वयःउद्देश्यविधेयभावेनान्वयः तथान्वयेमेदेनोपस्थितेर्हेतुत्वादितिभावः वस्तुतोऽयुक्तमेमतत्·वृत्ता
वपिप्राहात्वादिपर्यालोचनेनलोहितोष्णीषाइत्यादौतथान्वयदर्शनात्भाष्येतथान्वयेवृत्तेरसाधुतायाश्चानुक्तेश्चेतिमंजूषायांविस्तरः नचैवहरदत्तो
क्तिरेवयुक्तेतिवाच्यंआशीर्विषयक्रियान्वय्यर्थकान्यातिपदिकात्तद्वारकेआयुष्यादियोगेषष्ठीचतुर्थ्यातिसूत्रांर्थेनोभयोरविक्रियान्वयेनमिथोऽसा
मर्थ्यात्तदर्थेचतुर्थ्याबंधेनसुखादीनांसमासाप्राप्तेः अतएवज्ञापकपरभाष्यादिग्रंथसंगतिरेतदरूविबोधकमेवहरदत्तइत्युक्तंतेनतस्यपूर्वापरविरो
धोपिसूचितःक्वचित्तुहरदत्तइत्यपाठइतिबोध्यंतदाह·दिगिति·मूलेप्राचाप्रसादकृता·एवमग्रेपिपूर्वेस्वग्रंथविरोधंशंकते·ययपीति·फलेआहरणेति
पाठःफलेनाहरणेतिपाठेनआहरणंनाहरणमितिनशब्देनसमासःनताहरणमनाहरणमावश्यकाहरणंतत्द्वारेत्यर्थः यानेतितत्क्रियाकृतोप
कारइत्यर्थःइत्यादावप्रइति·अनेनाकृतिःसूचिताकस्यचिदुपकारस्यावश्यसंभवादितिक्रमेणद्वितीयापवादइयमितिप्रकरणकृतएवबोधइतिनत्वमिति·न
तुभावववचनघञादीनांतादर्थ्यद्योतकत्वेचेत्यर्थः इदं·तुमर्थाच्चभाववचनादितिसूत्रे एतदर्थमेवदृष्टांतोपादानमितिभावः तत्रतथाव्याख्यस्यफल

मोहे तनेति॰ व्यादिषां विधानापेक्षत्र॰ नुमुनीतदंतेन॰ एतेनेत्तुस्याध्यमोहोतरेति॰ विधावेषणयोरित्यर्थः॰ नइधोतनेपीति॰ नस्यधोतनेपीत्यर्थः॰ नुमुनंतेनेति
शेषः एवमग्रेपि॰ पूर्वेत्रिह नूतविधानयोरित्यर्थः॰ ननु प्राधान्येपि नियमसंभव एवात आहैवं चेति तस्य प्राधान्ये चेत्यर्थः॰ तत्रापाय कोत्र जनीत्यत्र॰ तदप्राप्ति
मेवमृत्वेउपपादयति॰ कर्त्तारमिति॰ प्रथार्थे विशिष्टस्यान्वये घटकत्वेन तस्यापि विभक्त्यर्थोन्वयसत्वादाह॰ तादर्थ्येति॰ एतेन प्रसादोक्तं एवु त्वत्तु मर्थकत्वा
भावान्नियमार्थित्वायोगादिति संदूष्यणुवुलतेइ त्याघनन्वयादित्यंतमत्वं मन्वयायोगायपातीत्यत्रापि सिद्धावस्थापन्नयन्नर्थं प्रतितादर्थ्याभावादिति दूषय
त्रत्नाकरः॰ परास्तः॰ मत्वाशयान्नवेवो धादितिदिक्॰ इमिच्चतुर्थी॰ कर्त्तरीति॰ प्रयागेइवतज्जन्यविभागाश्रयत्वस्य कर्त्तेयेपिसत्वादितिभावः॰ धात्वर्थप्रकृतत्वं
च वशावच्छेपामत्वं किंतु विवक्षितत्वमात्रं अत एव धनुषा विध्यतीत्यत्रापादानसंज्ञां बाधित्वा परत्वात्करणसंज्ञेत्याकरसूत्रभाष्यं संगच्छते॰ धनुषः
शरनिःसरणं प्रत्यवधिभावोपगमे नैव धनेः करणतामुपगमेनोभयोरपि निमित्तनिमित्तिभावेन स्थित्यावुद्धारोहेण विध्यतेर्निःसरणजन्यवेधा
र्थत्वाद्युपगदुभयविवक्षायां विप्रतिषेधोपपत्तेः॰ नन्वेमपादानमुत्तराणीति न्यायेनैव कर्त्तृसंज्ञापि तद्बाधिकास्यादितिसत्यं तं ब्रूयमत आह अन्यथेति॰ स
त्यंताभावेइत्यर्थः॰ इयमपादानसंज्ञा अपवादइति॰ विभागजनको व्यापारो ऽपायः॰ तद्विषये पल्कारकं तद्रूपक्रियाजनकं तादृशविभागाश्रयस्तदपादा रम॰
नमित्यर्थापेत्याप्रयोगादेतदप्राप्त्यानिरवकाशत्वेन विशेषविहितत्वेन च तदपवादः स्यादित्यर्थः॰ नन्वेवं कर्त्तृसंज्ञानवकाशास्यादत आह॰ कर्त्तृसंज्ञाति

ति॰ कर्मणीति॰ प्रयागात्ग्रामं गच्छतीत्यादौ प्रकृतधात्वपातगत्यनाविष्टत्वस्य सत्वात्॰ सत्यं तं ध्रुवपदार्थः॰ विशेष्यमपाय इत्यस्यार्थः॰ तथा च तत्कर्त्तरि त्वन्त्याय
नयं विशेषविहितत्वात्तदपवादः स्यात् इतिभावः॰ ननु पात्त्येति॰ धावनाविष्टस्यापि प्रकृतपतधात्वपात्तेत्यर्थः॰ त्रटनाश्रयेति॰ अन्यनिष्ठस्य धात्वपातगत्यनाश्र
यत्वादित्यर्थः॰ ननु अपसरणं पष्टेतागमनं विभागपूर्वकं॰ तथा च वस्तुतस्तन्निष्ठयोरपसरणयोर्भेदेपि स्वधातुनानिहृतभेदस्यैवापसरणस्यैव क्रियेति
तिभाष्यायभिधानादाश्रयगतभेदारोपेणाद्विवचनाद्युत्पत्तेरुभयोरपि तत्क्रियाश्रयत्वेन कर्त्तृत्वमेव स्यान्नापादानत्वं अत एवैकशेषसूत्रेभाष्ये उक्तं नैवाति
ष्टंतान्येकशेषारंभप्रयोजनंति क्रियायाएकत्वादिति॰ तथा परस्परस्मादित्यादिनविरुध्यते इत्यंतमत्वं मेषांतरेरितिहरिश्च तथा केयरहरेदत्तप्रकाशरत्ना
करदंइयाद्युक्तं चचिंत्यमितिचेत्सत्यं॰ तत्र मेषपदोपात्तमेषरेव क्रियाश्रयत्वात्कर्त्तृत्वं परस्परपदोपात्तयोरेव विभागाश्रयत्वादपादानत्वं अत एवं देवदत्तय
ज्ञदत्तावन्योन्यमाश्लिष्यत इत्यादौ तयोः कर्मत्वसिद्धिः॰ अन्यथा परत्वात्कर्त्तृत्वमेव स्यात्तविवक्षायाः प्रयोगानुसारित्वादेकस्यैव विभागस्योभयानुयोगिक
तोभयप्रतियोगिकत्वस्तत्वेपि कस्यचिदेव प्रतियोगित्वेन विवक्षेति मेषादिपदोपात्तेन तद्विवक्षेतिनातिप्रसंगः॰ एतेन तादृशोदिषप्रमेयः॰ स्वस्मादपसरी
नीतित्यादि स्वपार्श्वं प्रतियोगितायामवधित्वमवच्छेदकसंबंधमतायाः स्वपदवाच्यकर्त्तृत्वविवक्षाणात्॰ आत्मानमात्मनेत्यादौ शब्दकृतभेदाभावाद्दंतः
करणाद्युपाधिकृतभाष्योक्तभेदवच्छब्दरूपोपाधिकृतभेदाग्रहणे मानाभावात्॰ शब्दालिंगितार्थभानस्यैव न सोस्ति प्रत्ययो लोके इत्यादि हर्युक्तेरंगीका

रञ्च। अत एव चैत्र आत्मानं हन्तीत्यादौ शब्दभेदादेव तदुपपत्तिः स्पष्टा चेयं रीतिः कर्मवत्कर्मणेति सूत्रभाष्ये। एतेन मेघान्तरेति समानार्थिको भाष्यप्रभुवावितिं
हर्युक्तिरप्यपास्तेति दिक्। अतदावेशादित्यस्य विभागाश्रयत्वादित्यर्थः। संगतिरतश्चाह। तद्धातूपात्तेति। प्रकृतधातूपात्तेत्यर्थः। गतिशब्देनात्र स्वनिष्ठविभा
गानुकूलकर्तृनिष्ठक्रियामात्रमुच्यते न तु ग्रामादिनिष्ठविभाग इति भावः। तदावेशादितिपाठे प्रकृतधातूपात्तत्वाविष्टत्वादित्यर्थे कर्तृनिष्ठमेव। विभागा
श्रयत्वादित्यर्थे तु तत्रानिष्ठमपीत्यत्र तत्राह। तन्मात्रेति। तत्पदार्थमाह। विभागमात्रेति। मात्रापदेन गतिव्यावृत्तिः। इदं सर्वं कैयटादिरीत्या वस्तुतस्तु इदमा
स्य ध्रुवपदार्थत्वे तत्स्यात् यस्यास्ति तेनाधावतोऽश्वात्पततीत्यादौ ध्रुवत्वाभावादपादानत्वं कथमिति शङ्काया ध्रौव्यमविवक्षितमत्र यतः सतोऽप्यविवक्षा भवती
तिति भाष्यमसंगतं स्यात् तदुक्तध्रुवत्वस्य पतेर्धात्वर्थव्यापाराश्रयत्वात्त्रासत्त्वेन सतो ध्रौव्यस्याविवक्षेत्यसंगतेः सिद्धान्तेऽपि तदुक्तध्रुवपदार्थोक्तेर
वौचित्येन तत्संगतेश्चाप्तो कसिद्धान्यार्थेन शक्तिकल्पने गौरवाच्च। तस्मादवधिभावोपगमाश्रयत्वं सति तदन्यस्यावधित्वोपयोगिव्यापारस्यानाश्रय
त्वं अपायो गतिविशेषः विभागजनसंयोगानुकूलः। अवधिसाकांक्षो गतिविशेष इति भावः तत् तस्मिन् सत्युक्तध्रुवत्ववदपादानमिति सूत्रार्थः। अश्वादेरवधि
त्वोपयोगित्वाभिमानेन शङ्का। वृक्षात्पर्णमित्यादौ तदभावान्न तस्य तदुपयोगिता तत्र तु विद्यमानस्यापि तस्य तत्त्वेनाविवक्षितत्वान्न तदुपयोगित्वं तस्येत्युत्तरं
वंच ध्रुवमपाय इति वृक्षस्य पर्णमित्यादौ वस्तुतस्तस्यैव पर्णस्य तत्पातजनकत्वात्तस्यापादानत्ववारणाय संबन्धापाय इति कारके इत्यस्य शक्तिमाजनकत्वे नवि

५५

Dr. BHAU DAJI

वक्षिते इत्यर्थेनात्सर्पश्चाह कं ध्रुवपदं तु कारकं तद्ग्रहणमिवापादानस्याप्यवधिभावोपगमान्यव्यापाराभाववबोधनाय हरिपद्ये। तदावेशादित्यस्य तदा
वेशाविवक्षणादित्यर्थः। द्वितीयपाठस्तु करीत्यास्मगेवेति बोध्यं। तथा चापादानत्वशक्तिमान् तदवध्यवधिमत्त्वरूपसंबन्धस्य। पञ्चम्यर्थः तत्तत्सूत्रा
त्। सा च शक्तिस्तात्कारशब्दप्रकृतधात्वर्थविभागाश्रयत्वसमानाधिकरणप्रकृतसूत्रात्। अत एवापादानसमभिव्याहारे विभागस्यापि धात्वर्थत्वमा
वश्यकमिति बोध्यं। सूत्रे धौट्शब्दसंयोगानुकूलव्यापाररूपं पातमात्रमात्रं तु नापायः। वृक्षमजहत्यपि पर्णे भूमिंस्पृशति वृक्षात्पर्णमित्यप्रयोगात्। अ
त एव विभागजेति तत्र विशेषणं। अवधिसाकांक्षक इति तु वृक्षस्य पर्णमित्यादौ वृक्षात्पर्णमिति वारणायेत्युक्तमेव। गतिर्विनात्ववविभागजेति तत्र वि
शेषणं। अवधिसाकांक्षस्य इति तु वृक्षस्य पर्णमित्यादौ वृक्षात्पर्णमिति वारणायेत्युक्तमेव। गतिर्विनात्ववधिना नापाय इति कथ्यते इति हर्युक्तेश्च। अवध्य
त्वप्रयोज्यविभागानुकूलत्वं विनागतिर्नापायपदवाच्येति तदर्थः। तदेतद्धृदि निधायाह। वस्तुत इति। एवं च कैयटहरदत्तमूलं तथा पर्वतात्पतत इत्यादौ प्र
काशकारलाकरदं अपाधुक्तं च विंसं। अवधिशब्दस्य पर्यायमाह। स्मृतो। अवधिरित्यादि कोशात्तत्कार्यत्वे अवधिगमनं नमुक्त्वावधिकेः संसार इत्यादौ तत्थेव दर्शना
च मर्यादार्थकत्वेन वस्तुतस्तस्य तत्त्वेऽपि पञ्चम्यन्तेन रूपेण बोधात्तत्राटलीभावघटस्य वस्तुतो द्रव्यत्वेऽपि तत्तस्तद्बोधाभाववत्। तथा योऽवधिरेवेति प्रयुक्त
मत्त्वं तु युक्तमेव। एवं चावधिः पञ्चम्यर्थः लाघवात् न तु धात्वर्थ पाक्तो साधुक्तं व्यर्थत्वादिति मूलग्रन्थाप्युक्तमयुक्तमिति बोध्यं। तदभिप्रेत्याह। वधीति। उक्ता

येनैवाह। अन्यत्रेति। उद्योतादाविस्यर्थः। ननु वृक्षात्पर्णं पततीत्यादौ संयोगसंयोगानुकूलव्यापारस्य धात्वर्थत्वेन संयोगस्य तेन संबंधेन वृक्षासंबंधित्वादसंभव एवा
त आह। साचेति। तथा च वृक्षात्पर्णं पततीत्यादौ विभागानुकूलस्तत्समानाधिकरणो व्यापारो धात्वर्थः अन्ततस्तु वक्ष्यमाणरीत्या अन्यत्राप्येवमस्त्वं। न
न्वेवं विभागरूपफलाश्रयत्वाद्वृक्षस्य कर्मतापत्तिरत आह। कार्यिकेति। फलाश्रयेष्वाख्यातादौ येन संबंधेन यस्य फलत्वं स फलतावच्छेदकसंबंधः स च य
थायथं बोध्यः। तदाश्रयस्य विभागाश्रयस्य प्रतियोगितया। कर्तृनिष्ठविभागीयानुयोगितासंबंधस्यैव तत्र तत्त्वादिति भावः। तत्रान्यार्थं तन्निवेशेऽपि वस्तुतः
प्रकृतेऽतिप्रसंग एवेत्याह। विभागेति। तथा च वृक्षात्पर्णं पततीत्यादौ विभागजन्यसंयोगो धात्वर्थः। तत्र विभागे पंचम्यर्थो विशेषणं प्रकृत्यर्थश्चाप्र
त्ययार्थे वृक्षरूपापादानकविभागपूर्वकसंयोगः पर्णवृत्तिरिति बोधः। वस्तुतोऽपादानवृत्तीयं वृक्षापादानकं वा पर्णकर्तृकं पतनमिति बोधः। तथा च
संयोगस्यात्र व्यापारत्वेन विभागस्य तदजन्यत्वेन नातिप्रसंगः। वृक्षाद्भूमिं पर्णं पततीत्यादौ विभागजन्यसंयोगानुकूलव्यापारो धात्वर्थः। वृक्षात्फलं त्यजती
त्यादावप्येवमेव। ग्रामादायातीत्यादौ विभागजन्योत्तरदेशसंयोगानुकूलो व्यापारोऽर्थ इत्यादि यथायथं बोध्यं। वृक्षं त्यजतीत्यादौ विभागानुकू
लस्तदधिकरणो व्यापारोऽर्थ इति कर्मत्वेनापादानत्वबाधः। स्पंदेस्तु न विभागोऽर्थ इति वृक्षे स्पंदत इत्येव। चलतेस्त्वासनाच्चलित इति प्रयोगादस्त्येव वि एम॰
भागार्थत्वं। वृक्षाद्विभजत इत्यादौ विभागजन्यपूर्वदेशसंयोगनाशोऽर्थः। स्याद्वीपत इति तु कर्मण्युल्कार इति प्रागुक्तं। यत्तु नैयायिकाः विभागः पंचम्यर्थः

४६ ९

आश्रयत्वं प्रकृतिप्रत्ययार्थयोः संसर्गः विभागस्य च जन्यजनकभावेन धात्वर्थेऽन्वयः। यद्वा विभागाश्रयश्च पंचम्यर्थ इति तन्न। वृक्षापादानकेत्येवं बोधा
नुभवात् वृक्षाद्विभजत इत्यादौ विभागाश्रयश्च पंचम्यर्थ इति तन्न। वृक्षापादानकेत्येवं बोधानुभवात् वृक्षाद्विभजत इत्यादौ विभागस्य बोधाद्वृक्षा
पत्तेश्च। तत्रापादानस्यैव पंचम्यर्थत्वे किमर्थं जरतीयेन। आधेयप्रत्ययार्थयोस्त्वतत्कृतानभेदान्वयस्य त्यागापत्तिश्च एतेनाधेयत्वपंचम्यर्थवृद्धिप्रतिबंधादि
नादूषितत्वान्नधर्मीमदयेइतिरत्नाकरोक्तमपास्तं इष्टापत्तेः। युक्तं तस्य वक्ष्यमाणत्वाच्च। तदाह। अन्यत्रेति। उद्योतादाविस्यर्थः। निवृत्ते व्यापाररूपत्वे
न तद्वक्षणायामप्यनिर्वाहादाह। विश्लेषेति। एतेन तथा प्रकाशापुक्तमपास्तं। यथाश्रुतनिर्वाहे तद्योक्तिरयुक्तेत्याशयेनाह। उपलेति। क्रियाजनकत्वेना
विवक्षया संबंधित्वेन विवक्षायां चेत्यर्थः। एतेन मूले ज्ञातुरित्यस्य विस्तुतकमिति सूचितं। न हीजंतु बुद्धिकृतापायादवत्ताविवक्षायां षष्ठ्युक्तत्वेन व्यवहि
तान्वयो न युक्तः। न चेदृशविषये षष्ठ्यभावार्थमेव सूत्रवार्त्तिकादिरिति वाच्यं भाष्यकारीयप्रत्याख्यानविरोधापत्तेरेतेन सूत्रवार्त्तिकमतमेव युक्तं न
प्रत्याख्यानं मुख्यार्थमादाय पक्षापत्तेरिति कोक्तमपास्तमिति। संबंधिनीतिति। अत्र मान्याः लक्षणवाक्ये लक्षणपदमानाभावेन मुख्यार्थपु
रस्कारेण प्रयोगे षष्ठ्येव फलितेति। तस्याश्चानुरोधेन तदपवादत्वमात्रेण संबंधापेक्षत्वे स्वप्राकृत्यं इति तत्त्वात्। ऋकारकाधिकारेपाठे न क्रियाजनकत्व
मात्रविवक्षायामेतत्प्रवृत्तेश्च। यथोत्तरं मुनीनां प्रामाण्येन प्रत्याख्यानपरभाष्यविरोधापत्तेश्च। तदेतदध्वनयन्नाह। तज्जन्ये त्वर्थे इति। तथा च जन्यत्वं पंचम्य

थेः शेषपक्षपवादिकैयमितिभावः इदमपि च प्रकाशाद्यनुसारिमूलानुरोधेन · न तु तन्तुकृतस्य साध्यत्वधीसमानाधिकरणस्तद्विषयकोत्साहाभावो धात्वा
र्थः · विषयोऽत्रापायः नत्र कस्तत्रात्र अध्ययनापादनकोदिवद् तकर्तृकक्तृत्साहाभाव इति बोधः · तत्पूर्विका निवृत्तिरिति वा · एतेनानिष्टधात्वर्थः अध्ययनज
न्यमनिष्टमिति बोध इतिरस्ताः करणयुक्तमपास्तं तथा बोधानुभवात् अस्मोदशब्देन तदर्थोत्साहाच्च · भूतकालाविवक्षया सानिविषयमात्रं हित
तोलभ्यते प्रेक्षापूर्वकारी मनुष्याः अध्ययनस्य दुःखत्वदुर्धरत्वादि पर्यालोच्य बुध्या प्राप्यतनो निवर्तन इति भाष्येण सर्वथाध्ययनाप्रवृत्तावप्यस्य प्रयो
गस्येष्टत्वमातत्रानिष्टस्याध्ययनजन्यत्वासंभवाच्चेति बोध्यं · अपासंगतिमितीति · जन्मानुत्पत्त्यनुकूलव्यापाराश्रय इत्यर्थो पजनेरिति भावः स्त्वाह ·
नहीति · आद्यदोषस्यान्यथापि निवारणमाह · पद्येति · अप्रकृतदृष्टान्तमुक्त्वा प्रकृतं तमाह · जनीति · पूर्वमते · ति प्रसंगापत्तिरतस्तदाह · सोत्रत्यादि
ति · दृष्टान्तेतावेवेति भावः स्वेसिद्धान्ताभावादाह इदमेवेति · भाष्यादिस्थतमेवेत्यर्थः · तत्रैव · उपादानकारणे एवेत्यर्थः माया शबलं ब्रह्म जगदुपा
दानकारणमिति सोपनिषदसिद्धान्तः · ननु तस्य लोके शास्त्रे वान्यत्रापि प्रसिद्धिरतस्तदाह प्रख्यानेनेति · एतत्पदत्वप्रख्याने सर्थः जायन्ते इत्यस्यत
तेः प्रकाशेतेत्यर्थः ब्रह्मणोऽति · स्वरमात्रा · त्यर्थं ते इति यावत् ब्रह्मापादानिकाप्रजा कर्तृकोत्पत्तिरिति बोधः · निःसरणं लोकप्रसिद्ध्या यत्र राम०
स्मात्ज्ञायते तत्ततो निर्गच्छतीति लोकव्यवहारात् स च व्यवहार उपादानकारणविषय एवेति भावः अमनं · अन्तएव ब्रह्मणो जगदुपादानत्वे मतो वा इमा

नि भूतानि जायन्ते इति पञ्चमी सुष्टेमिकामाहुः पुत्रात्प्रमोद इत्यादावुपादानत्वारोपेणापादानत्वं एवं च शृङ्गो हेतुपदमपि तत्परमेवेति न विरोधः सूत्रार्थोऽसं
भावापत्तारंततो पीदमेवेष्टमित्याह · किं चेति · प्रकृतानुरोधेनाह · कारणेति · पद्यन्यत्र प्रथमार्थे सप्तमी साधुर्क्ति न चापि प्रकृतेहेतुपदेन तदर्थलाभा
दगत्या आह · निर्धारणेति · असंभवमेवाह नहीति · ननु लाघवाल्कृते रिक्ति बोधितौः तस्माह · व्याख्यानादिति · तत्र निर्मूलत्वादाह · जनीति · अत्रतत्तु सर्व
त्र · सर्वनाम्नामर्देशविधेयासतरलिंगाग्रीकारस्यैच्छिकत्वादाहैतदेवेति · हिमवतो गङ्गा प्रभवती · हिमवतो गङ्गा प्रभवतीति भाष्योदाहरणात्सूत्रे प्रशब्द
ग्रहणाच्चेति भावः · तदप्यधारो · पादानमितिसूत्रार्थः हिमवदपादानको गङ्गाकर्तृकः प्रथमप्रकाश इति तद्योगे चैनेति बोध्यं · पदजन्यपदार्थोपस्थितेरेव
शाब्दबोधहेतुत्वेमूला भिमतार्थो ध्याहारपक्षोऽयुक्तोः तस्माह · तदन्तेति · ल्यबन्तेत्यर्थः एवमग्रेपि · अपि ना शब्दान्तरत्वानसमुच्चयः तत्प्रकारमाह · यथेति ·
तस्यैवं चेति · वाक्येकदेशस्यैवं चेत्यर्थः · रूपाशक्तिरूपया · तथेति · प्रासादकर्मक पूर्वकालावच्छिन्नारोहणकर्तृकर्तृकं तद्व्यवहितकालं प्रेक्षणमि
त्यादि बोधन तत्रैतत्समुद्रायादिशक्तिरेतच्छास्त्रबलात् लोपे इत्युक्तेस्तत्प्रयोगेनापमेवार्थो ध्याहारः · पञ्चम्यर्थो ल्यबन्तार्थक्रियायाः कर्मोधिक
रणं चेति भावः · फलेभोपपत्तीति वक्तबोधप्रक्रियेतिसूचयितुमाहैवमिति · फलकर्मकाहरणफलकं पानमिति बोधात्तत्रापील्यमेवेति भावः · विशेष
योगमाह · तत्सरीति · पञ्चमन्तार्थ परिछेधार्थेवा च कादित्यर्थः तदर्थेति · पाठेन रूपोपयोगः · पञ्चम्यन्तं प्रतिपाद्योपयोग इति यावत् · महा अत्र तत्पदेन पञ्च

स्यंतपरामृश्यते॰ अन्यार्थेति॰ अन्यार्थकेत्यर्थः॰ तेन॰ पंचमीविभक्ते इत्यनेन च यथा चैतेरवत् अन्यग्रहणमपि प्रपंचार्थं स्यादिति भावः त्रितयसंनिधाने एव यतश्चनि
धारणमित्यादिवतस्य प्रवृत्तिरित्याशयेनाह॰ निर्धारणेति॰ अनभिधानात्॰ अनुक्तेः नीवार्थकयोगे तु तत्संनिधानमस्त्येवेति भावः ननु त[illegible]णे च त्वव
दत्रान्यपदवाच्यभेद एव तादृशो धर्म इति तदभिधानं कुतः॰ तत्राह॰ परस्परेति॰ तथा च साधारणत्वं तस्येति न क्षायेसाधकत्वमिति भावः॰ तद्वत् हृ
तरः कातर इतिवत् अपि पराद्रिसमुच्चायकः॰ सर्वत्र कारणादिचमाचामनुरोधेन वस्तुगत्वं तु अन्यतो वसेयंतइध्वनयन्नाहेति भाव इति॰ केयटो
कोरेनार्थत्वादाह॰ मेर्वेति॰ ध्रुवपर्यंतग्रहणस्य तु तारागणविचित्रितो॰ नरिक्षलोक इति तद्रूपस्तत्र॰ ननु प्रवृत्तानीत्यस्य कथामारम्भेत्यर्थो तत्राह॰
वधिमिति तत्र॰ प्रभृतिपदं॰ एवं चारम्भेत्यस्याप्येतदर्थकता बोध्या अवधौ च प्रपंचम्यंतार्थस्याभेदेनान्वयः तद्विशेषणत्वेपि तद्धतो धात्रुपादानेशे
सूत्रे यतश्चेति वार्त्तिकप्रत्याख्यानाय एदमत्र प्रयोक्तव्यं सप्त प्रयुज्यते कार्त्तिक्याः प्रभृत्याग्रहायण्या इति भाष्येण प्रभृतिशब्दाभावेपि तदर्थसत्तामात्रेण पं
चम्यत्यर्थकेन प्रभृत्यर्थयोगे पंचमीति वचनस्य बोधितत्वात् अन्यथा तत्प्रयोगाभावे पंचम्यर्थवचनावश्यकत्वेन तत्प्रत्याख्यानासंगतिः स्पष्टैवेति भावः राम॰
अत एवाहादीति॰ आदिशब्दाद् रूपान्यतरार्थक इत्यर्थः आरम्येत्यस्य ग्रहीतेत्यर्थो तु क्रमेणा तद्द्वितीयाप्रातः कालमारभ्येत्यादौ यथा॰ प्रभृतिशब्दार्थ
स्य तु क्रियात्वाभावान्न तद्योगे कदाचिदपि द्वितीया तदाहेत्यन्यत्रेति॰ शेखरादावित्यर्थः न्यूनतां दूरीकरोति॰ तेनेति॰ तद्ग्राहित्यन्तस्याहित्यरूपविशेषणेति

भावः प्राचोक्तं खंडयति॰ यत्विति॰ अनेन॰ प्रकृतसूत्रेणैव मध्येपि॰ आदिना प्रतिदाव परिग्रहः तथा च पंचम्यर्थः प्रतियोगित्वसंबंधः प्रतिनिधिप्रतिदानशाब्दे
कर्मक्रियाकस्तुरंतो॰ यत्संबंधिनी एतेन तत्सघुक्तात् पंचमीति सूत्रार्थः एतेनोभयत्रापि भावप्रत्यय इति हरदत्तोक्तमपास्तं॰ यतदोर्नित्यसाकांक्षत्वादाहो पा
दीति॰ ननु दत्तमेव न प्रत्यर्प्यते किंतु द्रव्यांतरमिति दत्तप्रत्यर्पणं प्रतिदानमित्यसंगतमत आह॰ ततुल्येति॰ दत्ततुल्यमूल्यवस्तुन इत्यर्थः आदिना वस्तुपरिग्रहः
एवं च तुल्यमूल्यत्वादिना तदेव वस्तु प्रत्यर्पितमिति प्रतिपत्तेरदोष इति भावः प्रकृतानुरोधेनाह॰ पराहत्येति॰ एतेन तथाप्रकाशणयुक्तमयुक्तं इति सूचितं॰
अन्यतरो यास्तत्राप्राप्त्या आह॰ हेत्विति॰ हरदत्तेति॰ संज्ञाक्रियाजातिव्यतिरिक्तं धर्ममात्रं गुण इति तदभिमानः अनेन सूचितारुचिमाह भाष्ये त्विति॰ ए
तेन तथाप्रकाशणयुक्तमपास्तं॰ इहेत्यस्य स्त्रियां चेत्येवार्थो मूलान्नतीयते॰ तत्राह॰ गुण इति॰ तथा चोक्तवार्त्तिकं तयोः ज्ञापकत्वबोधकमिति गूढाकूतं॰
ननु संनिहितत्वाद् द्वितीयासमुच्चय एव स्यात् तत्राहोभयोरिति॰ व्याख्यानादिति॰ अन्यतरस्यांग्रहणसामर्थ्यात् पंचमीभविष्यतीति भाष्योक्तरूपादिस
द्धेः वस्तुत एव भाष्यात् समुच्चय एव न द्वितीयासमुच्चयः फलाभावात् ततोऽन्यत्रापि दृश्यते इत्यनेन तत्तत्सिद्धेरेतेन तथाप्रकाशणयुक्तमपास्तमिति
स्पष्टमन्यत्रेति बोध्यं॰ अधिकरणे विभक्तिचतुष्टयस्य वक्ष्यमाणत्वादाह॰ प्रातिपदिकार्थेति॰ लिंगसंख्याकारकान्वयित्वरूपसत्वविशेषकत्वरूपतद्धिशे
षकत्वं यथितद्वूरे॰ तत्राह॰ सत्वेति॰ उक्तरूपसत्वमुच्यते॰ तेन ताहृशं प्रातिपदिकं तदर्थ इत्यर्थः न त्वेवं तस्यासंभवः तत्रापि तद्विशेषणत्वादत आह॰ द्व

रांतिकेति· उदाहरणेष्वितिज्ञातोवेकवचनं·ग्रामस्यदूरंदूराद्दूरेणवेत्यादिषु·क्रियेति·दूरादीनामस्यादिक्रियेत्यर्थः·नन्वेवमुत्तरसूत्रेप्येवंस्यात्तथाचदूरा
दावसथान्मूत्रमित्यादौनस्यात्तत्रतस्यद्रव्यविशेषणत्वादतआह·सप्तम्यधीति·अनुवृत्तेतु·दूरांतिकार्थेभ्यइत्यस्मिन्नितिशेषः·अस्य·असत्ववचने
त्यस्य·व्याख्यानादिति·आकरेकादितिभावः·एतेनतत्रानुवृत्तिः प्रातिपदिकार्थेविधिश्चेतएवेतिसूचितं·नचव्याख्यानंप्रकाशेस्पष्टं·नन्वेतावताकथंत
स्यैवसंगतिरतआहेवंचेति·क्रियायाश्चद्रव्यत्वंचेत्यर्थः·तत्समानेति·तस्यासंयोगरूपक्रियायाः समानाधिकरणंयद्विशेषणमल्पत्वावच्छिन्नतत्प्र
तिपादकत्वादित्यर्थः·अत्र·स्तोकंचलतीत्यादौ·नमन्वयेत्यस्यव्याख्यातत्वविशिष्टमन्वयस्यपृथक्कारणयाह·प्राचामिति·प्रसादकृतां·मूलेऽप्युः·प्रका
शकृतः·नत्यदेशान्यपरमशोभमायाह·सत्वेति·क्रियायाविशेषणत्वेऽसत्वरूपत्वानुपपत्तिरित्यर्थः·विशेष्यंद्रव्यमितित्वस्पष्टमितिभावः·पाकाद्याशयेना
ह·कटमीति·पाकइत्यादौपथाद्रव्यवत्त्वकाशस्तथाप्रकृतेनेतिभावः·स्वधर्म्येदृष्टांतसंभवेनतथान्युक्तमतआह·यद्वेति·अव्ययकृतोभावेइतिविहि
तक्तादेःस्तदन्तत्वपितेनपर्यायत्वेनधाधात्वपातकस्यापीत्यर्थः·नहिक्रियायाविशेष्यत्वांगीकारेअसत्वरूपत्वंनेतिवचनमस्ति·नवातद्व्यक्षणमस्ति
नवातत्सार्वत्रिकंनवातद्युक्तिसहंफलव्यापारयोर्मिथोविशेष्यविशेषणाभावस्यसर्वैःस्वांगीकृतत्वात्तस्याभाष्याद्युक्तासत्ववचनत्वभंगापत्तेः·मूलाद्युक्तरी
त्यातदुपपत्तेःसत्वाच्चेतिदिक्·इत्यादीति·इत्याद्यवेपथकदभिहितभाववदित्यर्थः·इत्याद्यावित्यादिनोष्टासिकाआस्यंतइत्यादीनामेवपरिग्रहःस्यात्किंचप्र

४८

५२

सिद्धंविहायाप्रसिद्धपर्यंतंधावनंव्यर्थमतआहेदमुपेति·ननुक्रियायाएकत्वसत्वात्पचतीत्यत्रतदनुपयोगोऽतआहादाविति·तथाचतेनपचतइत्यादिसं
ग्रहः·तत्रैव·क्रियायाएवस्फुटीभविष्यतीदमुत्तरग्रंथे·शब्दाध्यायइति·अतएवमूलेग्रेकर्मत्वोक्तिःसंगच्छतेइतिभावः·तन्निरूपितेति·लिंगनिरूपितविशेष्यता
पंसत्वाभेवेत्यर्थः·तथाचलिंगनिरूपितविशेष्यंद्रव्यंतद्भिन्नमद्रव्यमितिलिंगानं·न्यपित्वमेवासत्वरूपत्वमित्येतदेवकारेणसूचितंक्रियाशब्देननव्यापारमा
त्रमतआह·धात्वर्थेति·कारकपदस्यशक्तिपरत्वात्फलितमाह·करणत्वादीति·नन्वेवमपियजेनेत्यादावाख्यातोपात्तभावनायांयज्युपात्तयागस्यक
रणत्वेनान्वयादोषएवातआह·स्वातिरिक्तेति·स्वंकरणत्वाद्याश्रयबोधकं·पदांतरेणानेनस्वस्यापिपदत्वंसूचितं·इत्यर्थः·तथाचलिंगानिचक्रियान्वाधा
रकारकाणिचेतिद्वंद्वः·तैर्याक्रियानसंबध्यतेइयमेवनस्यान्त्रसत्वरूपताइत्यवधार्यतामितिकारिकार्थः·तत्रेदमेवसूचितंअसंबंधिरूपक्रियापदमत्रेन
नपुंसकत्वमाप्तेरतआह·लिंगेत्यादि·सर्वनाम्नांउद्देश्यविधेयलिंगयोरैच्छिकत्वात्विवेचितमिदंसर्वेरुपस्थानादितिदिक्·इतिपंचमी·व्यापरूपहेतोर्विश
ष्यत्वभावेनव्यभिचरितत्वेनसाधारण्यादाह·संसर्गेति·प्रत्ययार्थसंबंधपुरुषादिनिष्ठतद्विषयतानिरूपितत्वस्येत्यर्थः·प्रकारतायांरोज्ञादिनि
ष्ठायांतथाचगौणस्तत्रतावनात्वव्यवहारइतिभावः·पश्चाच्चनुमत्वासंगतेराह·प्रकृत्यर्थेति·षष्ठ्यर्थेतिच·तामेवाहयतुतदर्थेतितरेषु·प्रत्ययार्थसंबं
धस्याप्याद्यादीतिसमर्थस्त्रस्यभाष्यादावित्यर्थः·प्रतिपादितमिदमधस्तात्·न्यायमस्यव्यभिचरितत्वस्योक्तत्वेनोक्तन्यायेत्यसंगतमतआहप्रकृत्यर्थेति·रा

जार्थस्यैवेत्यर्थः प्रत्ययार्थं प्रति प्रधानादुत्पन्नषष्ठ्यर्थं प्रति तत्र हेतुमाह राज्ञेति तत्रैव तस्याप्राधान्यात् अन्यथा तु तस्य स्पष्टत्वं मूल एव स्पष्टं एतेन संबंधाभि
धानाय षष्ठ्या अन्यतरतो ज्ञाताया अन्यस्य प्रातिपदिकार्थवृत्तित्वं सुवचं नेत्यत्र पूर्वमेव प्रधानात् किं तस्यादिति पूर्वपक्षाभावः समाधानस्यायुक्तत्वाच्चे
षत्वेत्यादिपकोवेत्युतं तन्न बोध्यं चिंत्यमिति रत्नाकरोक्तमपास्तं शाब्दप्रयोगस्याप्रयुक्तत्वेन तथा प्रयोगदृष्टिविरहितार्थाप्रतीत्यापत्तेः तदुक्तनयन्नाह राज्ञ
त्वाभावमिति तथा चांतरंगत्वेन तत्र प्रथमेति भावः षष्ठीविवक्षायां अन्यतरपदार्थे इयमपि न्यायसिद्धमुचितमत आह क्रमादीनामिति एवं चेयस्या
र्थस्य वृत्तिमाह शेष इति इत्यर्थकसूत्रेणेत्यर्थः यथा श्रुतमूलासंगतेराह कृत्वार्थे तौ नामेवाह वस्तुत इति बोध्यमिति त्रानवपः तत्र कृत्वोर्थेति सूत्रे
मध्ये विछेदात् द्विवस्त्रदर्थस्येत्यादिषट्सूत्र्यात् असंबंधात् अन्वेभाष्यकृतः तेषां मत इति शेषः एतेन प्रकाशरत्नाकरदंड्यादिमिस्तथोक्तमपास्तमूर्यु
तरत्नाकरकृतेनेह व्याख्यातेति नवोक्तमयुक्तं मूलेसर्वपुस्तकेषु तस्यादर्शनात् इति तत्र मनोरमायां न व्याख्यातेति तदर्थादेतएवसर्पिष इति प्रती
कं ध्वनात् तथोक्तमिति केचित् मान्यास्तु नेह व्याख्यातेति तिङंतोदाहरणपरत्वमेवेति शेषः अत एवाह तस्या इतीति व्याचख्युः ननु तस्य सरितत्वे एवमा
नाभोवतम्लमयुक्तमतः तत्र संमतिमाहैतएवेति तद्भूलात् संप्रसूत्रीबलात् कृत इति तस्यागृहवाधेमानाभाव इति भावः तथाचेतीति तथा च
वार्त्तिकमित्यत्र संप्रतीकम् अत एवाह प्रतिपदेति अन्यथा तस्य वाचनिकत्वे तु केवलप्राप्त्या प्रकरणे वैयर्थ्यं स्यात् वार्त्तिके तस्यानुवादसिद्धार्थत्वापच्चा

५०

४३

अनुवादकत्वापत्तिस्तथाच वार्त्तिकापूर्वत्वापेक्षया सूत्राणामेव न तत्त्वमुचितमिति भावः करणेष्वपि इति इदं च समस्ते व्यस्ते च बोध्यं एते व्याख्याफलं त्वनुपद
मेव स्फुटीभविष्यति मूलं दूष्यमपि अत एवेति निसस्तुत्राणि कल्पनाभावप्रयुक्तलाघवादिति भावः न बाधकमत्र तदर्थमाह तथेति तत्र तदुक्तौ सत्यामित्यर्थः
अन्वत्र पक्षे तत्रापि निषेधापत्तिनेत्कं तु वक्ष्येवेत्यपि युक्तः तत्र शेषे चेत्युक्तौ तु गौरवं स्पष्टमेव कर्मणि सूत्रस्य सागेतु कर्तर्यपि प्राप्तिः तथा च तत्र निषेधेनासमस्ते
शेषे निषेधेन समस्ते सिद्धमेवेति तत्र करणेत्यत आह द्विवस्त्रर्थेति तथा च तत्र पाठो दुष्कर इति भावः यद्यपि षष्ठी शेषे कर्तृकर्मणोः कृतिइमयप्राप्तौ कर्मणी
त्यग्रे द्विवस्त्रदर्थस्येत्यादि कृत्वोर्थे संतं पठित्वा करसेत्यादिपाठे कर्मणीति लभ्यते तथापि तदर्थस्य तत्र प्राधान्यापत्तिरिति बोध्यं अत्र दोषांतरं सूचयितुं
सिद्धांतपक्षे आशंकते नन्विति वैकल्पिकेति महाविभाषाधिकारादिति भावः अनोभविष्यप्राप्तौ तोदात्तस्यैवसत्वेन मूलोक्तावि शेषो युक्तः इति शंकामपा
कुर्वन्नत्र व्याख्याने बीजमाह करणेति आदिना ज्ञानादिपरिग्रहः अनो भावेति कारकादृत्तेस्सतो कारकादित्यनुवृत्त्या कारकात्परस्मात्प्रत्ययांतं भावकर्म
वचनं अंतोदात्तं भवतीति सूत्रार्थः एतेन हरिस्मरणमित्यादिनिष्कर्षं इसंतं तन्न बोध्यं कंचित्यं शेषषष्ठीसमासेपि कृत्स्वरस्य दुर्वारत्वात् तस्मात् मध्यमपदलोपिस
मासेन तत्साधुः तत्र समासोन्तोदात्तत्वं षष्ठीतत्पुरुषे तु कृदुत्तरपदप्रकृतिस्वर इति विशेषः तथा च संबंधप्रकारकबोधविवक्षायां मध्योदात्तानां हरिस्मर
णमित्यादेरसाधुत्वापत्तिस्तु मिष्टस्त्रीतिपरमनिष्कर्ष इति रत्नाकरोक्तमपास्तं सर्पिषो ज्ञानं मातुः स्मरणमित्यादेरसाधकत्वमंकुरोष्मितमि

DR. BHAU DAJI MEMORIAL

तिङ्किमक्रमयोगम्यां कारकसंज्ञासत्त्वेपि स्वरविधायके पुकमादिकारकग्रहणस्यैव ग्रहणात्कारकस्वरप्राप्तेः अत्र हि सूत्रे यो मुख्यक्रेस्य संबंधस्य प्रकारस्तयाऽभावान्नेति दिक्॥
आदीति॥ आद्यग्रहणावच्छिन्नव्यापाराणां भूतत्वेपि सर्वेषामतत्त्वात्प्राप्तो वचनं यदि लवयवगतभूतत्वस्य विशिष्टे पर्यवस्यति इति वदाऽएवस्तद्वार्तिकं नेष्टबंधयं दि
तोयांतमेततस्प्रेष्यादिशेषः ननु गमकं विना कथमादिक्रमेवोधोऽन्नाह प्रेतित्तस्य प्रारंभघोतकत्वस्य प्रसिद्धत्वादिति भावः॥ अनुदात्तादाविति॥ अनुपूर्व्यादाधा
नोरादिक्रमेणोक्तः आदिना अवदत्तमिदत्तं च प्रदत्तं चादिक्रममपि सुदत्तमनुदत्तं च निदत्तमिति चेष्यते इति भाष्योक्तसंग्रहः एतेनादिक्रमेणेति प्रदत्तशब्दस्यैव वि
शेषणं अन्यत्र तु निषेधस्यानेनासः प्रसमभिव्याहारं विना आदिक्रमलाभान्नादिति कैयटोक्तिः परास्तान्तदुदाहरणप्रश्नोक्तभाष्यविरोधात् अनेनस्तु उपसर्गत्वाभाव
बोधनद्वारा तादृशाभावबोधनं तथा च प्रकरणादिनेति हेतुदृष्टांतेपि बोध्यः तदाह प्रकरणादीति॥ आदिना संयोगादि॥ उक्तव्याख्याबीजं प्रकटयितुं क्रस्य
चिह्नक्तिं खंडयति एतेनेति॥ आदिक्रमेणक्तेरिक्तसंभवेनेत्यर्थः॥ अत्र॥ मातुः स्मृतमित्यत्र॥ अधीगर्थादीति॥ कर्त्तृकर्मणोः शेषस्यापवादोयमिति एतस्योत्त
रसोरावसंबंधः सकर्मकत्वादिति॥ अविवक्षितकर्मकाणां तु नतत्वेन ग्रहणं मानाभावादिति भावः॥ ननु नुदात्तादौ भाष्यप्रामाण्यात्तथात्वेपि अत्र तथात्वे मनाभा
वोऽत आह कर्मणः इति॥ तेषामपि तत्त्वेन ग्रहणस्य प्राक् प्रतिपादितत्वात्तथा चाधीगर्थेषु सस्य विषय एवायमिति भावः॥ वेदमपि तत्फलमिति प्रनीयतेऽत
एवापि मूलेऽप्राप्त इति भ्रमनिवारणायाह तस्य विधे इति॥ तथा च पूर्वार्धस्योत्तरार्धे हेतुत्वेनान्वय इत्याह एवं नेति तत्र कर्मषष्ठीप्रतिषेधे वेत्यर्थः॥ तत्र॥ मातुः स्म

तमित्यादौ॥ अपि तत्र मातुरुक्तस्य रसिद्धेः समुच्चायक इति भावः॥ ननु किमशब्दस्य त्रिलिंगत्वाद्योर्त्वं प्रथमपुंस्त्वमत आह होर्थेति॥ द्वितीयांतत्वेकश्रमेमिति असमस्तत्वेनादृ
शार्थशब्दसामानाधिकरण्यादिति भावः॥ प्रथमस्यांतत्वेर्थेति लिंगसर्वनामनपुंसकताभ्युपगमेनेति भावः॥ दुर्लभमिति॥ एवं च किमः क्लीवत्वं सुतरां दुर्लभमिति
भावः॥ आद्यं क्लिष्टमिति॥ सामान्येन पुंसकत्वस्यागतिकगतित्वात् स्यायतशब्दप्रयोगे तथा प्रयोगे नयुक्तः कमर्थमित्यस्यैव क्रुशाक्यत्वात् इति॥ अर्थः समा
से पृथगुपस्थितस्याभावात्पृथक्संख्याया अभानात् तथा च नेदं तदुदाहरणं युक्तमिति व्याचष्टे॥ अर्थासंगतिरिति॥ उत्तरपदार्थस्य प्राधान्येन जिज्ञासा विष
यत्वाप्रतीतेरिति भावः॥ वस्तुतस्तु अस्येदित्समासे इत्यर्थः ननु किं सबहुव्रीहिश्च तुर्थ्यंत सुरुषो वा नाधु इत्याह त्वस्येति उक्तएवाशयः॥ तत्स्येत्याहार्थासंगे
तिनत्रजिज्ञास्यत्वाप्रतीतेरिति भाव इति धेयं कमर्थास्ये दोषमाह कोर्थ इति॥ अयणे चेति॥ एवं चोभयायणमावश्यकं नान्यतरेण निर्वाह इत्ययमेव कृश
इति भावः॥ भाष्यविरोधं परिहरति यत्विति॥ सर्वनामसूत्रेति॥ सर्वनामसंज्ञासूत्रे इत्यर्थः॥ यथाश्रुतेति॥ वार्तिकार्थाभावविशिष्टस्त्वमनेन इत्यर्थः॥ अतएवः यथा
श्रुताभिप्रायकत्वादेवः सूत्रेपीति॥ सर्वनामानीति सूत्रेपीत्यर्थः॥ अन्यथा मुखेनोक्तमर्थं व्यतिरेकेणाह यतिनत्विति॥ इदं वार्तिकं॥ आदिना हरट इत्यादिपरि
ग्रहः नेत्यधोदाहरणोक्तेरिति भावः॥ तत्रायोनार्थविरोधेप्याकर्षोक्तिरेव प्रबलेत्यत आह हताविति तौ॥ तथा चार्षप्रयोगे यो विरोधेपि संगतिक्रमगतिकेना
न्यायेनेयमिति न दोषलेश इति भावः॥ भाष्यापनुक्तत्वान्मूलोक्तस्याप्रामाणिकत्वं घनयितुं सिद्धांतमाहान्तेति॥ ततः॥ अश्रादिति भाष्यप्रयोगे इत्यर्थः॥ मूलं सम्

व्यपतिरिदमेत्रेवेति· षष्ठ्यंतसंबंधे सूत्रेवेत्यर्थः अनुकरणानं प्रकरणयन्नुक्तप्रकाशसंभवात्प्रकारांतरेणान्यूनतां परिहरति अस्याधिकारादिति· इत्यत्र· भाष्यवार्तिके इत्यर्थः एव
मंत्रेपि· ततीयासहार्थेनलक्षणाच संबंधांतेविध्यंतपपदस्येति ध्वनयितुं नावता प्यनिर्वाहात तदर्थमाह ततः परेणेति· सहेति शेषः विनापितयोगमित्युक्तेनो साधुत्वं च
न्यत्र पूर्ववत् निर्वाहादेनं बंतलमनसि निधायप्रकारांतरेण समाधत्ते ततइति· षष्ठ्यंतादित्येनपेतियोगेनेति विभागविहित षष्ठ्यंतादित्यर्थः एवं चेदं सर्वं वृत्तिप्र
क्रियायामनुपायिमत्वाशयवर्णनमात्रं योगविभागेमानं तु अनंतसंबंधे नेति षष्ठीप्रकरणेकरणेनेव षष्ठ्याः संबंधसिद्धेउत्तरत्र संबंधबोधकषष्ठीग्रहणमितित
दाहृते· भाष्यत्वपोगविभागेन दृश्यते· विपरीतं षष्ठ्यंतसंबंधेति सूत्रात्पूर्वमेनपेत्यस्य पाठइति लभ्यते· एवं चक्रूत्तस्वरितत्वकरणादधिकारत्वं पंचम्याः संबंधोन्यायः
अतएवग्रहणादुत्तरेणास्मदीयं स्वाधिकारात्परेण ततः परेणेत्यादिप्रयोगसंगतिः एवं च षष्ठ्यंतायुक्तेवेति तत्त्वं· एतेन मत्वतपरकोशरत्नाकरदंड्याघुक्तमपा
स्तम्· ननु मते पृथग्ग्रंथे इत्यप्रतीतिरयुक्ताप्तथासति ननु द्वितीयात्ततीये इतिपाठोचित्येन षष्ठीपदघटितपाठासंगतेः तस्याः सूत्रोपात्तत्वेनासमुच्चेयत्वात्· नच तथैव
सांप्रदायिकः पाठइति वाच्यं बहुपुस्तकेषु वमेवोपलंभात् अतआहा तइति· पंचमीमात्रसमुच्चयादित्यर्थः एवेनद्वितीयादिव्यावृत्तिः अत्र· एतत्सूत्रत्वस्यपु·
क्षदनुसंहितैकपदार्थेनयुगपदनेकार्थबोधः।तत्राबोदाहरणमध्ये।अस्यापाप्युक्तः।इदमुभयमपिप्रातिपदिकंतत्रैएकक्रियादावेवान्व
यसत्वात्तादुक्तंहृद्दे।सकृदुच्चरितःपाहुःसकृदर्थंगमयतीतितत्राशादान्वयीति।तथाचक्कचिद्विभक्त्यंततमनेकशानयोगपद्येछाचित्रा
तिपदिकतंत्रेसमूहात्मकमेकमेवतदर्थत्वात्रानमित्यत्रान्वयनेकपदसमभिव्याहारत्वाद्धृथेकपदसमभिव्याहारस्यनियामकत्वादितिवो
ध्यं।तत्फलंतुनियमफलंतुप्रत्यर्थेति।अक्षाभन्ध्येतामक्षाशेर्थंतीमित्यादावर्थमर्थः।अपिरर्थावयौप्रतीत्यादिव्यक्ष्यमाणसमुच्चायकः
अतएवाहकदाचिदिति।तत्राघेवीजत्योक्तलोदत्येप्रमाणयतिअतएवेति।सहविवक्षावद्यत्वादैवेत्यर्थः।असहविवक्षायामेक
शेषेतुतत्रास्यसावकाशत्वानिरवकाशत्वाभावेनभाष्योक्तिरसंगतास्यादितिभावः।।तत्रैवदोषांतरमाह।किंचेतितत्रस्ट्रौऽक्त
नियमप्रवृत्तौअन्यत्रअसहविवक्षायांसंभवेति।पयःपयोनयतीत्यत्रवारणायसहविवक्षायामेवैकशेषइत्यर्थलाभायचेकग्रह
णमितिरत्नाकरेकिंचनन्वेवमसहविवक्षायांतंत्रापतिरतआहासहेतिद्वन्द्वादौत्यस्येपमेवेत्यत्रान्वयः।एकशेषेतुबहुवचनादिवदाम
चनापत्तिरितिभावः।भक्तिमहविलोकनप्रणयिनीनीलोत्पलस्पर्धिनोध्यानालंबनतांसमाधिनिरतैर्नीतेहितप्राप्तयेलावण्यानस्ह

सवैसिकमलासंकोचदीक्षागुरूदुर्गामागेणनीललोहितसमित्स्वीकारवैश्वानरासत्यप्रीतिविधानदक्षविजयप्राभावभीमप्रभोसामाश्रि
वरधीरवत्सरपूर्तवैरिचमूत्क्षिपाः।अत्रविदुषांमानसामिन्नमानसाधिकारकध्वंसेत्यापर्थः।।तत्रप्राक्षीयप्रयोगविरोधंपरिह
रतिनचेतिइतद्दृत्येवकथादितिभावः।गौरवमितिप्रतिपत्तिगौरवमित्यर्थः।उभयाश्रयणादितिभावः।आश्रयणेतेजियः।दोन्वय
ननुद्वंद्वनिवृत्तिःफलमुक्तमितिकथंप्रत्याख्यानमतआहानेकेतितत्रसाहित्येनेन्वकशेषस्यसहविवक्षाविषयत्वेकपमन्य
त्रातदुक्तिरतआहद्विरितिआदिनाअक्षाभत्र्येतामित्यादितत्रपरद्वतिसमानफलकत्वान्नपक्षकद्रत्यर्थः।असहविवक्षायांविभ
क्त्यंततेत्रीणीकाणादितिभावः।तत्रापिविशेषसिद्धांतमभूतमाहसचोक्तेति।अनन्यार्थेकग्रहणेनयस्यांविभक्तावेकशेषस्तांविभक्तौ
सरूपाणामित्यर्थेनयामाहाविकशेषोनोजसादाविति।खंडनकारोक्तिखंडयतिएकेतिस्वच्छार्थमित्यस्यव्याख्याएकस्यासाधुता
पत्तेः।अनभिधानेचमानेसत्रानर्थक्यापत्तिश्चघटघटावित्यस्यापितत्तएववारणानतनवघटघटमित्यतद्वघटद्रत्यतःसमूहाप्रती
त्याकथमेकशेषःअत्रापिप्रकरणादिगमकवशात्तत्प्रतीतौवाधकीभावात्अन्यथाऽनेकब्राह्मणंभोजयेतिसामानाधिकरण्यानुप
पत्तिः।अतएवनब्राह्मणंहन्यादित्यादौव्यक्तिपक्षेऽनेकब्राह्मणहननादावपिप्रत्यवायःप्राक्षकृतानिषेधःसमूहस्यप्राधान्यादेक
वचनेहननान्वयस्तुतत्रवाधातव्यक्तिध्वेवब्राह्मणानोप्रातेभोऽयतामितिवत्पद्वतिरत्नाकरेक्रतत्वंदुमतिसमाहारेतिएकवदितिनपुं
सकमनपुंसकेनेत्येवसमाहारेतरेतरायंतादृश्द्वेविवहाताऽनीमातिवस्त्राणीत्यादिसिध्यानदैयर्थ्यादितिभावः।एतेनोक्तदापकादितरेतरद्वंद्व

विषयेतद्विधानेपिसमाहारद्वंद्वविषयेऽपवादाभावात् घटघटमितिद्वंद्वापत्तिः नचाहस्तुसमाहारस्यैवात्रापनभिधानात्तद्भावद्दन्तिवाच्यं। तत्रस
माहरणस्यवाधवदत्रतद्भावादित्याशंक्यैवकारापकर्षेणसरूपाणामेकशेषएवद्वन्द्वोनान्यइतिव्याख्यानेनतत्ससमाहृतिसिद्धिमित्यभिप्रेत्यमेतो
क्तमपास्तंऽक्तयुक्तेरेवापकर्षोव्यर्थइतिस्वरूपवंश्रापविरोधापत्तेः तदपकर्षस्याफलस्यान्याया प्राग्युक्तत्वात्योनःपुनंपोनःपुनि
कद्वन्त्वादौतद्धितद्वन्द्वेमातमातम्पांमातमात्रोरित्यादौद्वंद्वस्यचानापत्तेश्चेतिदिक्।अनेकंग्रहणमित्यादौतुलक्षणया
सामानाधिकरण्यंबोध्यंशेषग्रहणंचतिद्वन्त्तिमदवस्थानवाचीतिरत्नाकरीयसंगत्याग्राहेकेति एतत्सबोध्यएववाक्यं।अन्यथापदार्थ
कदेशत्वान्वयस्यात्ततत्रतयोर्मध्येनान्वयेकथंबोधोऽतआहतत्रेतिनिवृत्तेलोपवच्छष्टीयत्वेसतीत्यर्थः।लक्षणोजिमनसंग्रहायाहवृत्त्येति
एतेनतत्स्मरणात्क्षोधइतिनिरस्तंऽक्तयुक्तेः।प्रत्ययानामितिकृत्यत्तिमत्तापत्तेः।एकशेषशास्त्रमज्ञानतोबोधानापत्तेश्च।अनेके
तितत्फलानुकूलत्वेनफलाश्रयवयवानामित्यर्थः।निवृत्तेतिशाब्दशक्तिस्वाभाव्येनधातुवाच्यक्रियायास्ततःकर्मादिभेदेपिनिवृत्तभेदा
याएवप्रतीतेरितिभावः।संख्यापदरतयाआहद्विवत्वोरपीतिएतावदेतितत्मत्रित्यत्यर्थः।एकइतिअंतरतमइत्यर्थः।तदाहतथाचे
तिअन्यतरस्याम्प्रमाणाभावात्तदेशावयुभयसाम्यमाहयस्यापिप्रसज्येतेत्यर्थः।उभयोरन्तर्गतेनचेतिआघशेषस्यैकलादाहकदा
चिदितिअन्यत्रातिप्रसंगोनिराचष्टेएकोदीतिएकश्चैकश्चद्वौचेत्पादावितिभावः।अभ्यर्हितत्वादुपस्थितिक्रमाद्वाएकशेषशब्द रामः
स्यपूर्वनिपातः।गार्ग्यइत्यादौपितुरेकत्वात्प्रकृतिरेकापत्रस्तुवहवःप्रापूर्वंतिपघापितयापियतित्यत्रवन्तैकाविवक्षयानेवारणीयास्तु

दाहेत्यलमिति।आपत्तुहिफलमाहतेनेपितिअतएवाहप्रत्ययेतीतिचासरणाहाविलेऽतोहातत्वापत्तिराघुदात्तस्सःयत्तुचुदुषः
प्रत्ययस्येतिवाच्येयोगविभागादनित्यमिदंतेनचुंचुपादौनेत्वमितिरत्नाकरस्तन्नभाष्यानुक्तत्वात्तदध्वनयन्नाहचुंचुपावितितद्धे
येआहपरेतिडादेरित्वानापत्योपदेशपदाननुवृत्तिरितितत्तात्पर्यतस्यखंडितत्वाच्चाटेरचोपेवमित्वाभावइतिबोध्यं।अतएवतत्र
युक्तविभक्तित्वादेवनस्याइतिसूचिमाहमाष्येत्वितिननुतथैवकृतौनोक्तमतआहान्यत्रेतिहानीमिन्नेइत्यर्थः।चौवाक्यालंकारे
लोपासिद्धत्वंवहिरंगतया।एतेनतथाशास्त्रिदंस्याद्युक्तमपास्तंवाध्यविशेषचिंतायांकारमकमाहातएवेतिऽक्तन्यायांगिकारा
देवेत्यर्थः।नहैपाष्येमितिअचीत्यनुवृत्तौबाधकाभावादित्यर्थः।।अनंतरणानित्यस्यप्रतिपक्षिणोवाच्यत्वंनोक्तिरयुक्तोऽतआहा
नंतरेतितथाचोतदलमव्यवहितापेक्षंनव्यवहितापेक्षमितिभावः।ननुतुल्यधर्माणामन्वितसंज्ञावतदंतसंज्ञाभावायत्तदावप्रय
कमतआह।संवुद्धावितिव्यवहारात्सोत्रातत्तदंतस्येतितथाहिसतिएङ्ह्रस्वादित्यत्रं।गाहपामावेनहेकतरादित्यस्यासिद्धि।
एतेनतदर्थतादितिशास्त्रिदस्याद्युक्तंसामंत्रितमित्यत्रत्यामनोरमास्तमत्वाचिंत्या।अन्वर्थसंज्ञावत्तऽदेशस्यापितुल्यत्वात्ताव
प्रत्ययमात्रस्यैवेतिसौकाप्रादितिशास्त्रधुर्ताचापास्तंतद्ध्वनयन्नाहतस्मादितिकार्यकालपक्षेणाहसंवुद्धेरितिअप्राइतिअग्यासं
ज्ञासत्रघटकेत्यर्थः।परिभायांतदंशस्यप्रत्ययेइत्येतयोगविभागेनतदंशमलकत्वाजहाहप्रत्ययेइतिशेषमाहस्वत्येति।इये
तिधअयमेववाचात्राक्षेपपदार्थः।।तथाचानद्विशेषणत्वेमेऽदेरितिपूर्वतदंतविधिःतदंतांशास्तुनप्रत्ययविधावितिनिषेधातद्

दमेव सूचयितुमत्रोगसंज्ञासूत्रानुसरणम् ननु प्रसिद्धाक्षेप एवात्र कुतो नात आह अनुमानेति अनेन तस्याजिरि क्तत्वं निरस्तमुत्पत्तिर्वैचित्र्ये
रागहत्यनुपस्थितस्यापि शब्दाद्व्यन्वयसंभवादाह फलेति दोषान्तरमाह किंचेति प्रयोगेष्विति शेषः अतएवाह शब्दाद्विति अतएव उक्तहेतु
द्वयादेवात्रेदित्यस्य समाहितमाख्येदित्यत्रान्वयः प्रत्ययेष्विति सप्तम्यन्तं आपूंकेति तदंतविधिनाविशिष्टस्य प्रत्ययान्तत्वादिति भाव
। यस्मादिति एवं च विशिष्टस्य न प्रत्ययान्तत्वमिति नीकं दोष इति भावः एतेन तत्र परस्पर प्रति अंग प्रत्ययसंज्ञाभावादिति भाष्यमु
पप्रकृतिमत्तेरेण प्रत्ययस्याभावात् तद्विधौ निमित्तत्वेनाश्रयणाच्च प्रकृतिः प्रत्ययनिमित्तप्रत्यये परतोंऽगसंज्ञाविधानादौ प्रत्ययायो
क्षं तत्रान्यतरस्मिन्नुपादेये यमानेऽव्यभिचारादितराक्षेप इति कैयटोक्तमपास्तं तद्धितेति द्विगोरिति तस्यैवांगपदार्थत्वाद्दाहीति
तस्य विशेष्यं मूलोक्तं समूलयति हलश्चाविति ह्रस्वान्तानां प्रकृतिरित्याह प्रकृत्येति अणन्तस्यांग … ताद्ध्रस्वांताच्चेत्यर्थात् हेक
रादित्यत्र तावताप्यदोषात् प्राचांमते नाहोभ घतइति स्मिन्नूंति तदभावादाह तत्स्वीकारेपीति ङ भयत आश्रयस्येऽतादिवद्भाव
स्वीकारेपीत्यर्थः तेन मे … दिशा दाह ह्रस्वेति ननु स्यान्निरूपातिदेशेन तत्संभवोऽत आह तादृष्येति … उभयत आश्रयेणा
दिवत्त्वाभावात् हे ज्ञाने त्यो दोपरत्वात्फ … ह्रस्वात्परसंबुद्ध्याभावान्न लोपो न स्यादिति तदर्थं तथा व्याख्यानेत्त ताह ह्रस्वग्रहणे हलो
विशेषणं न बुद्धेरिति नोभयत आश्रयणमेतेन स्रोपः सोरिति निष्कर्षः परास्त इति शास्त्रीत तत्त्वं … याह एतत्तदर्थमेवेत्यस्यार्थमा रामः
हमस्येति ङकारोत्येति भावः ननु ह्रस्वांतांग … मंतवद्भावेन लौकिकेनैकदेशेति न्यायेन संबुद्धित्वं मस्यात आह । धेतिति तत्र न्यूनचिका

रेएवतत्प्रवृत्तेः हेत्वंतरमाह केचिदिति येन विधिरित्यत्र भाष्ये कैयटयोर्ध्वनितमिदं ननु शास्त्रीयोऽस्तु सः तस्य तत्रापि एङ्ह्रस्वादित्यादौ प्रवृत्तेरत आह । म
कारस्येति अत एव उभयोरप्रवृत्तेरेव । एतेन तत्र तदप्रवृत्त्यर्थं पूर्वं ग्रहणमिति शाब्दयुक्तमपास्तं सिद्धांते शंकते नचेति अलविधित्वेनास्था
नत्वे धाविति निषेधादिति शेषोऽत तस्य संबुद्धित्वस्य अलिति अणादेरप्यकविधेयताकत्वाभावादित्यर्थः तस्येत्यस्य संबुद्धिसंज्ञा
सूत्रस्येत्यर्थे तु यथाश्रुतमेव साधु तथा च तस्या अपि विशिष्टसत्वेनास्य स्तएमनल्विधित्वमिति भावः एतन ङकारोत्या साफल्ये
न सेताकृत बहिरंगत्वाभावादाह … रेति पूर्वं मंतरंगं परं बहिरंगमिति भावः नन्विना सहितस्येत्यस्य संबोधने लोपाना पतिरत आह सेपेः
ति अनेनहे शादृमत्तिः … तोटतिहेत्तद्धादिपरिग्रहः अत्येति एतेन तदर्थमेङ्ग्रहणमावश्यकमेवेति दंङ्युक्तमपास्तं अत एव मूले हे विस्रो
इति प्रत्युदाहरणांतरं दत्तं इति … इति एतेन ह्रस्वांताद्विहितस्येत्यर्थे न गुणे जातपि न क्षतिरिति प्र… इति शाब्दयुक्तमपास्तं हेत्व स्मी
त्यादाव व्याप्तेः परिभाषाबाधमानाभावाच्च न नु गुणे कृते संनिपातपरिभाषया लोपो न स्यात् एङ्ग्रहणस्य सेदित्यादौ सावकाशत्वाद
त आह सामर्थ्यादेवेति प्रत्याहारग्रहणसामर्थ्यादेवेत्यर्थः से प्रभृत्यर्थत्वे ग्रहणमेवका … मितियुक्तमेव … त विनिर्णा … त्वनिधा
नमेवेति भावः ननु … शेषदप्रवृत्तावपि राम इत्यत्र ह्रस्वग्रहणस्य सावकाशत्वेन गौरीत्यादौ परत्वाद्धलङ्याबिति लोपं बाधित्वा अंबार्थेति
ह्रस्वे संबुद्धिलोपो न स्यादत आह गुणादिति अत एव ह्रस्वांतेपि तदप्रवृत्तेरेव आदिनाहे गौरीत्यादिपरिग्रहः एतेन स्वतःसिद्धे इ ग्रहणार्थ
मपि तत् अत एव गुणात्संबुद्धेरित्येव सूत्र्यतामित्यपव्यापादाभिमिति शाब्दयुक्तमपास्तं अस्समवलत्वेन परत्वासंभवादाहांश्रुवेति ननु तस्य

BHAU DAJI

नित्यत्वेपिलोपस्योकारीत्यांतरेगत्वमकृतव्यूहेतित्तु नास्येवाता आहचेनेति यद्यपि समइत्यत्रापि संबुद्धिगुणः प्राप्नोतीतिसोपिनिरवकाश
त्वापिफलाभावात्तत्रतदप्रवृत्तिरितिभावः वृत्तिकारग्रुक्तमाहपूर्वेसवर्णेइतिद्विमात्रेतितदादीत्यर्थः तेनकुमारीमित्यादौत्रिमा
त्रेसंग्रहः अवक्तव्यमिदं उक्तंयथाचित्यंतथाभावप्रकाशेस्पष्टं समेतिहत्तौ तद्इतरेतरद्वंद्वपरतयातद्विवरणंबोध्यं यतुचूडाः
लःलोमशब्दइत्यपिप्रत्युदाहरणमितिशाब्दिदंतु तत्रभवतत्पक्षत्वात्त्रेत्वेफलाभावात्तदूध्वनयन्नाहकरोतिपत्तुरङ्गेह्रस्वादितिवेदा
ञ्जिगप्रकृतेःपुंसीतिविकृष्टत्वमितिशाब्दमादयस्तत्रप्रागुक्तरीत्याप्रसिद्धआसैपासंभवात्पथपिस्पोक्तासैपःस्वचस्तथापितत्र
गौरवोदाहपुंसीतीतिअतिखट्वानित्यादिसिद्धये आहविहितस्येतियथाश्रुतमेवततोपिलाघवात्योजयतितत्रेतिवाकैकदेश
त्यायेनप्रयोगइतिभावः पुंसः किंरामाः अयोगवाहपदमन्वर्थमित्याहनविघतेइति अतएवतेषाममकारीपरिपाठेनादत्वादेवअ
त्रमाहतदुक्तमितिरणभ्यामितिपंचम्याव्यवहितेऽप्राप्ताविदमेकेवाक्यांविध्यर्थमित्यभिप्रेत्याहादर्शनेतितत्रनावद्यार्त्तिकमतेना
हाद्धातिरिक्तेतिननुताबतापितस्यानिवारकंकिमतआहतस्मादितितदुपस्थितिलध्वमित्यर्थः नदुक्तंवार्त्तिककृता आगमभाष्यविरो
धंपरिहरतिएतदितिद्रत्यादिस्थप्रयनेतिशेषः ननुनेदंसिध्यतीतापूयकंतस्याप्येवस्पमांशाल्वातततथासत्तुक्तार्थतानेनपुंकायामपितत्र
कत्वापूनस्यैवौचित्यात् अतउभयोरप्युक्तिरत्याप्यैवेतिपूंकावतत्वमेवेत्याशयेननत्रहेतुमाहचुदुत्वेतिगुरुत्वसंपत्तये आहप्रतियो राम:
गीतिइत्युक्तेपितितत्सामर्थ्याल्लब्धमित्यर्थः लाघवार्थंतथाप्याहेतुनोक्तार्थसिद्धिरित्याहतस्मादितिसमाधानपरभाष्योक्तेरपीत्यर्थः

नायंसिध्यतिइत्याहेतदितिइतोलाघवात्यथोक्तदंभुनीनांप्रामाण्यादेतत्खंडनीयप्रवृत्तेश्वसिद्धांतमाहमाष्येत्वितिपाठक्रमादार्थक्रमोवलीयानिति
न्यायेनाहअवायेपीतिविभज्यतत्रणत्वविधायेतिशेषः छांदसोभिसोलगितिसूत्रयन्नाहनुमोमितितदर्थमेवाहाक्षरेतिनियमस्यसजातीयापेक्ष
त्वादितिभावः व्याख्यानमितिएतेनोक्तरीत्यायोगविभागोविनापिनिर्वाहःस्फुरदितिदंशुक्तंवस्तुतोअवायेपीतिनकार्यंऽक्तहापकातत्रानिर्दिष्टा
गविकलपरिभाषोपस्थितिरद्कुविभतिपूर्ववन्नियमार्थश्चात्शुक्तंचापासंस्वंरूपमितिशास्त्रेतोरणादेःसंज्ञाप्रवृत्त्वात्तत्रचशब्दस्येवप्रवृ
त्तिनियतत्वेनतस्यैवभावप्रत्ययवाच्यत्वादाहरणकारेइतितदुक्तंहरिणासामान्यान्यभिधीयंतेसंज्ञावानेविशेषिताःसंज्ञाशब्दस्वरूपंवाप्र
त्ययैस्तत्तलादिभिरितिन्यायायाप्रवृत्तिरितिपाठः न्यायानामितिपाठेविषयभेदकृतंबहुत्वं अपेतिरथाभ्यामित्यादौ तस्मिन्नित्यपूर्णाभवो
त्तमाहप्रत्येतिप्रत्ययविधौचापंचम्याइतिनिषेधादत्रतदंतग्रहणानानन्वन्योपकारकलेनदुयोर्गुणत्वात्गुणनामितिन्यायेपरिभाषाप्रवृ
त्तिर्नस्यादत आहगुणइतिलक्ष्यानुरोधएवव्यवस्थाबीजं ननुतदादिग्रहणात्केवलप्रकृतेरग्रहणंनस्यादत आहप्रकृतीतियत्तुअत्रय
स्येतिचेतिलोपापत्तिः आस्तद्वत्वेननप्राप्याभावप्रसिद्धत्वमितिपक्षाभ्युपगमात् आसोरिति तत्परकरणेनतदन्तत्वात्सूत्रस्यप्रत्याख्याना
द्ववस्तुतोरूपोदाहरणमेततत्कार्यादाहरणांतरेयतदइत्यादिस्त्रीअपर्यपेत्याशविथडस्यादितिप्राप्तिदंडप्रभ्येतर्यस्तन्नेतिध्वनयन्नाहस्त्री
प्रत्ययेतिआदिनाप्रयोइतयतीत्यादौयगोपरिग्राहःननुउभयस्यापेक्षत्वमुभयोस्तुल्यमितिकथंतत्वमतआहतत्रहीतिननुस्त्रीप्रत्ययस्यविधा
नेपिसोविधानांगत्वाद्विग्रहणोक्तेपिदोषएवातआहप्रत्येतितत्सफलोत्तरमप्याहविधीतिइतिसइत्यापनतदादिग्रहणफलेमूलोक्तमयुक्तंतदभा

तदभावेपितत्रारंभसामर्थ्यादेवतत्सिद्धेः यत्तु यमवयमगतो आप्यां यङ्लुकियापामिवावामीत्यादौ तत्र इतार्थमिति शाब्देंदुप्रभृतयस्तन्न यङ्लु
कष्ठ्यां दस्त्वात् तदेतत् ध्वनयन्मौलादिपदसंग्राह्यमेवाहकरणमितिश्रा चोक्तमेवाहतत्पासतीतितदर्थं क्रमाह किं चेति अपिः। सिद्धान्तसमुच्चा
यकः यत्तु ततोऽधिकस्येतिस्पष्टार्थमिति शाब्दोक्तिपदरेखंत्वनिष्टप्रतिपादनपरं प्रत्यासत्त्या लङादितिमितांऽस्यग्रहणादिति शाब्देंदुप्रभृ
तयस्तन्नेत्याह ओगेति अंगस्येतीति अधिकृतेत्यादि मूलव्याख्याने दंऽघुत्यसांगात्पेध्वनयन् सिद्धान्तपक्षमाह आकारादिति इदमपि तदभ्युपेत्यवस्तुतः
सपक्षएवायुक्तइत्याह किं चारंतादिति अपिनांगाधिकाराभावपक्षसमुच्चयः ननु कथं तस्यांगत्वमत आहस्थानेणेत्यस्यापीति अपिः समुच्चयसमु
च्चयेन लभ्यतेतिनिषेधस्य लब्ध्यांगसंज्ञकस्येत्यर्थादनित्यत्वाद्वाऽप्रवृत्तिस्तदाह उक्तरीत्या अवर्णग्रहणेऽर्थवत्परिभाषया अप्रवृत्त्या नेदमद
सोरितिनिषेधारंभेण च सर्वत्रैव सिद्धिः स्पष्टं चेदं भावप्रकरणे न चात्रान्यथा वारणमत आहार्थवदिति एवं च तत्पोक्तं रघुकैवस्यात् ननु प्रत्या
सत्त्याभिसूत्रनिरूपितांगादित्यर्थे नोक्तदोषोऽत आहाभिसट्टाति न च तत्रान्यथैव वारणमस्तु अंगाधिकारस्याचान्यत्रयोजनेन भविष्यहीतीत्यत आ
हेदमेवेति किं तत्र हि पंचाभिः क्रोष्टीभिः क्रीतं कुलं पंचक्रोष्टं इत्युक्तं। भिसः प्रत्ययस्यैव ग्रहणमित्यत्र नमानेतस्याः परिभाषाया लक्ष्यासंस्कार
कत्वात् एवं च प्रत्यासत्तिः सर्वथा दुर्लभेया एवं च तत्पाव्याख्यानेचित्यमेव फलाभावात् दाहृत्पलमिति। स्येवेति कष्टायेत्यादिनिर्देशात् प्रतिपदो
क्तत्वाच्छ्रवेन सप्तम्येकवचननिरासः तस्य भिन्नादेशाविधानात् न च विकल्पोऽस्तु सर्वनाम्नः स्मैस्मिनावित्येव सिद्धे ङसिङ्योरित्यत्र ङि ग्रहणावैय राम
र्थ्यापत्तेः ङेरामित्यत्रतु स्त्रियामित्यादिनिर्देशात् स्यैव ग्रहणं तदेतदभिप्रेत्याह व्याख्यानादिति हापकमूले पमितिसीरदेवाद्युक्तेरसांगात्पेध्वनय

न्नाहोपत्तौ वाव्येतितदुक्तार्थासांगात्पेध्वनयन्नाह संनिपातइति पूर्वपरयोर्विशेषणविशेष्ययोश्चेत्यर्थः ॥ विधिरित्यत्र कर्मणि किः तद्विघातस्ये
त्यत्र कर्मण्यणित्यणित्याह तं संनिपातमिति संनिपातविघातादृत्यत्र भावे घञ् एवमग्रेपि एवं च दीर्घविधौ तदविघातकत्वान्नेतत्प्रवृत्तिरिति भा
वः॥ ननु संनिपातलक्षणाविधिनिमित्तनिमित्तकत्वस्यात्रांगीकारात्किमस्या अंतरंगत्वमुक्तयादेशस्येति चेत्तत्र नाद्यदृत्याहारोपितेतिनेौ
एवमग्रेपितत्र अंतरंगे ननु तत्त्वानमेवेत्प्रवृत्तौ निमित्तमात्रामित्यनाद्यहोषेणास्य पक्षः सम्यगेवात आह किं चेतिगौरीत्यस्य हेड्यादि
स्यानीति आद्यसूत्रेण नियमशास्त्राणांनिषेधमुखेनप्रवृत्तिरिति पक्षेणोदृविधिमुखेनेति सिद्धान्तपक्षे प्रत्ययलक्षणेनेति वो ध्यं हस्वत्वस्य
वार्थेतीत्यादिः तत्र हे गौरीत्याद्यौ भाष्योक्ते नदीह्रस्वत्वं संबुद्धिलोपस्यानिमित्तस्यादित्यादिकृन्मेजंतइति सूत्रस्य भाष्ये त्यर्थः तदसंगतमिरा
सायशंकते संनीति नात्र संनिपाते तत्त्वेत्रे त पाठोऽक्तोर्थः। क्वचित्तु भयत्र तत्रेत्येव पाठस्तत्राद्यस्य हे गौरीत्यादौ द्वितीयस्य एमा येत्यादावित्य
र्थः। कथमिति अतएव कृहस्वत्वस्यादौ दयादिति भाष्योक्तसंगतिरिति भावः विशेषमाह कार्यस्येति पूर्वस्येत्यर्थः सूत्रेतद्विधा पकेऽयेत्यस्यावि
क्षिप्तेत्यादिः एवं च तत्र एवे क्वसिद्धावनित्यत्वमफलमिति भावः भाष्यविरोधापत्तेरितिहेतुं सूचयन्नुक्ताशयेनैवाहाव एवेति तदनाग्रहा
देवेत्यर्थः समाहितमित्यत्रान्वयः अन्यथापूर्वकायाएकदेशप्रयुक्तित्वेनयोजनेपि समाधेस्तथैव वाच्यत्वेन न तत्पातेपातदुक्तसंगतिः। स्पष्टेव
तदाह नत्वंगेतिनहितद्विधावदंतस्येति अंगसंहेतुक्तमित्यर्थः। नन्वेवपरत्वान्मूलेतदुक्तेखएवोचितोऽत आह विरोधेतिपरत्वेपि पाठतस्त

त्वेपि मतांतरमाह तस्येति यत्रोत्पन्नदृत्तौ एगोष्ठित्वादावनायत्तेरहोत्योगृछितरात एतेन एत्वे तत्प्रवर्तनेन अन्यथानुपपत्यातत्प्रवृत्तौ तत्संगतिः स्यषे
व एतेन सर्वं घामिति निर्दे पूर्वे नेतत्प्रवृत्तिरिति शास्त्रि दं प्राग्नुक्तमपास्तं निर्दुष्टमुदाहरणमाहरणमाम्पामिति बहुवचनग्रहणस्येति भावः
उक्तहेत्वाभावाघः। प्रलीनेति तिस्पासि आहेटित्वेति। प्राचीनमतेनेदं केचटमतेसिध्दांतमते च स्यानिवत्वाप्राप्तेः सर्वत्र सप्तमीनिर्देशसंगत्या
पत्यात पाकर्तुमेवदुर्वचमिति तत्वमत एवेटित्वेति पाठेन प्रचुरइति वो ध्येन न्वसामेवलेस्य पदांतत्व स्त्वापवादत्वाद्योतरं च त्वेपिन्या
सेनप्रक्तो आह वाधित्वेति अस्य भवतीति शेषः। अवसानेइति रलमुडा शेगतिसू अपवादोपीति त्यापेन तांतेइ त्यायेनाम्पा वाद्योध्या अ
तएवासंयोगोदित्यत्र नद्युपधेम्पइति वा तिकखंडकस्यनवास्कस्यानवकाशत्वादपवादो गुणस्येति वार्तिकखंडिकायामुक्तं तत्र पदन
वकाशे कित्करणंगुणं वाधतेइ हमुनरूभयं सावकाशमीत्युत्तवैतितेत्पा शेइति भाष्योक्तौ स्कस्यकित्वे फलाभावः इहतु संसृष्टारणविधौ
कृतार्थत्वादुर्वलेनातिदेशेन प्राप्यमाणो गुणनिषेधो दुर्वलत्वान्न तद्विधिनासह स्पर्धते नातइ त्यायेनेति केचटेनोक्तं परसवर्णत्वमिति
वार्तिकादर्शदित्विदं नेति प्राचस्तत्वबाकृ वाणिति भाष्योदाहरणेन तस्यत त्रपेचलवोध नात्त दाहेपूर्वत्रेति तत्र त्रेस्वयइति पूर्वत्रसफले
चर्यचमीत्वेवीत्रमाहनामीति शास्त्रि दं प्राग्नुक्तिखंडयति यत्वितिनदीत्वेतिमत्पतिरवद्गरो। नन्वेवमपिति सूणामित्यादौ सावकाशोऽत
आह तिसृणामिति एतेननैकमुदाहरणंतत्रतदनुवृत्तिरितिभाष्यदयविरोधेन प्राचोशेषि क्षिप्तादीनामुक्तिखंडनायाह प्रियेतिसिद्ध राम:
इति नुड़ित्यर्थः। तदुक्तिं निराचष्टे गोणइति न नुवहुवचनमेवत त्पेतितेरुक्तमेवात आह बहुतितित्र तदप्रवृत्ता वप्युपेत्या पि शेषांतरमाह

नैकमिति एवमप्युपेत्योक्तमिदानीं तस्यवैयर्थ्यमपि न तस्य तदर्थत्वमतिप्रसंगापत्तेरित्याह समेति घट्चतुरइतीत्यर्थः तदभिमतं भाष्यरूप
मानांतरेखंडयति क्वचित्पंचम्यातदंतेन तस्य तथार्थसाधकं तदभिमं भाष्यं तरमपितथा आह घट्म्पइति नदो घइति विहितविशेष
णत्वेपीति भावः। ननु लोके गणनायां तदपाठतावताप्यर्थं कथं तत्वमतस्तदाशयमाह क्तांतेत्यत्रेति नमाम तिइति तदाशयइति शेषः। नन्वे
तावता लुप्तविधौ तथा लाभेपिनात्रेत्यत आह प्रकृतेपीति घट्चतुर्भ्यइत्यत्रापीत्यर्थः। तथैव विहितविशेषणमेवतुल्ययुक्तेरिति ध्वन
यन्नाह घड्भ्यइति आदिना आतइति द्वितीये भ्यसंहारमाहेति गोणेइति इक्तभाष्येति नैकमुदाहरणमितीत्यर्थः। अंगेत्यर्थेमानमा
हाप्तोमिसइति तन्त्रवृत्तात्पर्यमाह पचत्येव मिति नन्वेवं भाष्योक्तहेतोः कागतिरत आहे विरुद्धेति तत्रतत्वेहेत्वंतरमाह उत्तरेति तन्वे
वे केचटस्य कागतिरत आह घड्भ्यइति हरदत्तोक्तिंखंडयति नचेति भज्यर्थत्वाश्रयणेइति शेषः। तत्रफलमाह तेनेति। एतेन केय
यतुरो धेन दीक्षितशास्त्रि दं प्राग्नुक्तमिश्रोक्तिं खंडनाय कृत्र पायइत्येव सिद्धेइ दुस्वग्रहणसामर्थ्यमनुपसर्गाणामेवेति हंसमुक्तंह
त्पीतादिहितस्येत्यर्थो भज प्रवंगतिपूर्वेनविवक्षितः पदृन्नइत्यत्र प्रास्त्रयमतिष्ठितिविषयसप्तमी एवं चतत्र हलतादेवविधिरितिनुदो
प्रसंगः यद्वा आमिपरतोयद्दृश्यं तं दृष्टं ततः परस्यामोनुडिति वाक्यार्थः आह्वतौ चहू स्वग्रहणेनेवामां यद्वा दुस्वग्रहणसामर्थ्यात्प्र
वेनुटपश्चाद्दीर्घइतिशास्त्रोक्तं चापास्तं तदाहेतिद्विगोति ननु पूर्वं वदत्रापि दीर्घो स्तत्राह सर्वत्रेति ननूक्तन्यायकातस्या अनित्यत्वं प्राग्
क्तमेवेति न सतदभावसाधकोऽत आह कृताकृतेति तन्मात्रत्वेनापिनित्यत्वाभ्युपगमाद तत्राप्तिः नामीत्यस्य प्राप्तिः स्यादिमिसतिय

पाश्रुतसूत्रे आयादय आर्धधातुके तत्र परे आयादीनां नित्यत्वमिति पक्षे गुप्तिज्ञो गोपेति न स्याद्गोपांगोपांचकारेति स्यात् आयादिप्रकृते य
दार्धधातुकं तत्र परे तेषामुत्पत्तिरिति पक्षे प्रागुक्तेष्टसिद्धावपि गोपायेतोष्वंतस्य तोत्पत्तौ कालीकृते आयादयो वा ततः सार्वधातुके नि
त्यमिति न्यासभेदपक्षे गोपायिष्यतीत्याद्यावित्यस्यादिः परत्वादिति लादेशप्रवृत्तेः परस्य नासीदिति पक्षे इदं तथा च स कृत इति न्यायेना
याद्यागोन स्तुरेवेति भावः लब्धं तस्योक्तावन्वयः नास्तीति सति प्राप्यस्य तिवेति पूर्वपक्षः विपूर्वपक्षच्छायान्तं तद्भोविनप्रवर्तीत इति मन्यते स
नास्तीति पत्रेन्यवह्लक्षणप्रवृत्तेरिति भावः एतेन पूर्वोत्तरस्येति नामीत्यस्यानित्यत्वमिति दूषणं कृतस्य अनित्यत्वात्तोमेव दीर्घ इति
नामीत्यस्योपाः प्रासोऽनिष्फल एवेति नामीत्यस्योपन्यासो लेखकप्रमादिति यदूचरतां चिंत्यमिति मनोरमा चिंत्येति च पूर्वमुक्तं चापालं
खंडवकरोतीति खंडयति यावत्तिन्यांतात गौरवमपि प्रकृतेनेत्याहेवं चेति कृते नामीत्युक्तौ चैतीत्यर्थः प्राप्तेरेवोक्तरीत्या अभावा
दिति भावः एतेन नतितिं त्यारंभेत्यर्थ इति पूर्वाविदं पूर्वोक्तमन्यथा च दूषणं पूर्वोक्तमप्यास्तां नोक्तमिति डणादीनां मतुपन्नलेनभं गपूर्वे दे
ष्ठेपि प्रत्यासत्त्या नु इति यकि निरूपितं गस्यैव ग्रहणे नानेत्वादनश्च इत्यादावदोषेपि अक्षराणां तइत्यादौ पूर्ववत्रे तिनठोऽसिद्धत्वेन
चतस्यापि संनिपातेतिवद्भूषः ड भयवाधकल्पनस्यान्याप्यलाभ पूर्वाद्भवाधापेक्षया लौकिकवाधस्येवौचित्याद्बुत्येवमदोषेपि पूर्व
त्रेत्यस्यानित्यत्वज्ञापनसंभवात् स्येतिस्याने प्रत्यय इति करणपक्षेते नान्वयस्य चानापत्याऽनश्च इत्यादौ दोषापत्तेः पदलाघवं तु एमः
संवोमात्रालाघवस्यासार्वत्रिकत्वे प्रतिपत्तिगौरवस्य सर्वथावश्यंत्वमित्येवमर्थत्वाच्चेति पूर्वः एतेन ष्यप्रतिग्रहंततदित्ययास्तंतत्रठावि

धावर्ये पुनः षग्रहणकर्तव्यतापत्तिर्मंडकप्लुत्यापत्तिश्चेति मनसिकृत्य वाहरणाभ्यामिति एवं सर्वसंमतिमहत्त्वाघवमित्याहेवं चेति सर्वसंग्राह
कतट्टोक्तौ चेत्यर्थः अथ द्वंद्वाधिकारफलमाह यद्वंद्वेति इत्यणकोऽत्ति समाहारद्वंद्वे सौत्रं पुंस्त्वं व्याख्यानादिति समुदायेद्धृष्टा इति न्याय मू
लकादित्यर्थः नन्वेवमादेशप्रवृत्तेपि तत्त्वापत्तिरत आह सातेरातिसते न तस्य तत्रलक्षणलोति पूर्वोक्तमन्यथा मनोरमोक्तं चापास्तं लाघ
वादाहरणद्वयमिति एतेन ततो न षत्वमत्र मुष्ठेत्यादौ निपातनात्तत्तथा चविश्वपादिविति प्रसुदाहार्येतत्रत्रलिटस्थित्यादि सिध्यर्थं त
दुच्चारणमावश्यकमिति दंग्धं पूर्वोक्तमपास्तं विपरीतगौरवायत्तेः तत्रवीतं ध्वेनयन्नाहहादीति तिनतत्थावहुव्रीहिणा तत्रासमुदायेयुगप
ल्लक्ष्यप्रयोगाभावात् आनर्थक्यात्तदंगेष्विति न्यायेनाहावयवेष्विति अस्मादेव सौत्रत्वाविहायनिपातनाश्रयणफलमाहणत्वेति एवं
च लोकेपीत्यादिः क्वचित्तथा पाठ एव नन्वविपूर्वास्संति धानात्कर्थंतदंताविधिने च पूर्वसूत्रंततत्त्यातिप्रसक्त्या दत आह प्रयोजन
मितिनमितित्थाचग्रमकेसन्येवतस्यतत्त्वाणिकारेनान्यत्रतिनातिप्रसंग इति भावः नन्वव्ययनिषेधेन तत्रस्य फलमत आह प्रयमेतिभ
गवत्तेवतथासूचितमित्याहेतएवचेतिरीतिरन्वयेहेतुः स चोत्यन्तौसाचार्यैः। चसंग्राखत्तलित्याहत्रलादीति एतेन तथानदेर्थेन। ननु ह
एवणत्वमसिद्धेत आह दीर्घाच्चेति अव्यवहितात्ममायाहत्रलादीति एतेन तथानदर्थेन। ननु ह्रस्वे एवणत्वमसिद्धेरत आह दीर्घाच्चेति
अव्यवहितात्ममायाहपरेति नन्वेवं कथंतदेतदिधिरत आहातइति नन्वेवं सर्वनामांतादित्यपि कुतो नात आह तस्यालिति आद्यन्तभावतोल
घुभूतंमलानुक्रमाहांगेति अगसंज्ञानिमित्तस्यात्परस्य सर्वनाम्नोविहितस्येति सिद्धान्तार्थे तु न दोषलेशः अत एव मूले सर्वनाम्नः स्मै

द्वासञ्ज्ञात्वनयोर्द्दृष्टात्तावतः सर्वनामद्वयेनावन्मात्रमुक्तम्। सिद्धान्तमाहुरपरे त्वातनन्तकरीत्या नापि त्वमत आह त्वं होतिहि यतः साज्ञात्वाद्दाहानस
वेति योऽपतानिवेशादेवेत्यर्थः अन्यथा तद्भावध्वनितमिति तत्र त्वाचेऽविकारस्य क्षिल्करणं सर्वादेशार्थमित्याशंक्य प्रश्लेषेण समाहि
तद्वितीयेपि तदुदाहरणमिदमरक्षिति प्रागुक्तरीत्या संख्यं मन्तस्य श्रीतिप्रतिपाद्योक्तरीत्याऽनेकाल्त्वात् संसाध्यमानत्वेव कृतमिति ज्ञापना
र्थं द्विग्रहणमित्युक्तौ मूलाकृदन्तरोधे। नाद्यदन्तादिति सिद्धान्तस्यकृत एव एवमग्रेपि। ज्ञानमिति ऽक्तसीत्येतिभावः अत एवेति अन्यथास्
कृतद्भावाभिद्रुः स्वादौ न संलेपीत्वा प्राप्तेरं त्वेतद्भावाद्यत्तद्दानर्थक्यस्य स्पष्टमेवेति भावः। तेनैव परिगणनेन अन्वर्थसंज्ञालभ्यमाह सर्वा
र्थेति तन्वेवेबहुवचनमेवस्यान्नेकवचनादीत्यत आह सर्वविश्चाविति एकशेषेणाहसादिगणोति अनुभनावयवभेदेत्यर्थः। तेविना
पि बहुवचनमाह यद्यपीति संज्ञायाः सामान्यसूत्रेणैव सिद्धे गणसूत्रार्थमाह व्यवस्थेति नित्यप्राप्तेऽवधारणार्थइत्याहेवेत्यर्थ
इति अनेनसूत्रानिषवचनान्तस्यैव व्यवच्छेदाद्द्वावादिकं भवत्येव ऽभेद इति अर्थपरत्वेएवायं नियम इति पूर्वपरत्वेऽभादित्यादिभव
त्येव रूपेऽविशेषस्यस्पष्टत्वादाह प्रत्ययेतिन्याया तत्वार्थे परिणामिवरूपाकृत्स्नितेइति सूत्रभाष्योक्तात्तन्नन्येव कश्चिद्दोषोऽत आ
ह युष्मदिति वचनात्। ओकारसकारेति वार्त्तिकात् तत्र युष्मदस्मच्छब्दमात्रविषयं भाष्यत एवोदाहरणात्तस्यैवेति तत्र स्थः प्राति
पदिकादित्युभयस्तं वं घनकं चित् एवं तौ वयवप्रादिकस्यैव कश्चित् एवं तस्यैवेत्यर्थस्ततएवातदन्यसर्वनाम्नां प्रातिपदिकटेरेवप्रा रामः
ग्रात्यर्थः ननु पाहाभावेद्दष्टौ तेतावत्रलादिकमेव कथमत आह होभाडुदात इति ननु अस्वारितत्वाद्वित्यस्यानतुह्न्यातमपि कल्पेनविक

त्वादिस्याच वा कासिद्धिर्नस्यादत आह महेति ऽकन्यायस्यतत्राप्रवृत्तेरप्तायं चेति बाधकविषयद्दृति विषये स्वार्थीति अत्यंतोत्पादिः अत्राद्द
तीयवा केन तु दृष्टिविषयेतद्विधाने ऽनया वा सह्यपादावतिप्रसंग इति चेन्न तत्र तल्लिमित्तं किं तन्यदेव वार्त्तिकसिद्धमिति प्रतिपादयन्वार्त्ति
कमवतारयति अयं चेति ऽकृरीत्या तदसंभवाद्दोहोमयेति ऽकृरीत्या तत्र वस्तुतस्तत्परत्वं नैवात आह। विषयेति विषयत्वेत्यर्थः विषयेआ
दिनोभयेदेवमनुष्याइति सति तस्मिन्नयचद्वयं स्यूयेतेतिभावः तस्यद्वितीयस्यतत्रगत्यंतरसंभवादाह रूपादरिति ननु के तत्संभावना
या अभावात्सर्वमचिऽभयतदत्यादिवतद्पाठेतिविशिष्टस्यसर्वनामत्वेनाकत्वेवस्यादयवादत्वादितितस्योक्तरीत्यातत्संभवेनीतीति अथ चो
नप्राप्तिरिति कथंतदापादनं मूलेऽत आहायचोति अयवादेपीतित्यायेनाहायेति एवं चाकजर्थः पाठ इति मौलेसिद्धं तत्र दोषमाह
त्रेदामिति। न त्वेकमिति न्यायेनाहाकजिति नतु संज्ञोपसर्जनव्याहृत्यर्थं तदत आह। तभीति अपिमावतरणमाहोमयोन्यत्रेतीजितरिति
वार्त्तिकेत्यर्थः एतेन स्वार्थिका यज्ञतस्यैवतत्र ग्रहणमिति द्रष्टुकमप्यास्त एवं चतद्वत्द्विवचनानुदाहरणेचा। एते नामिश्रमतोद्गत्वा
वच्छिन्नपदार्थे प्राधान्येऽभावितितादकूपदार्थद्वयसमुदायद्वयप्राधान्येऽभयावितिसाधुरितिन पूर्वविरोध इति शास्त्रोक्तमपास्तं
एतदितिऽकृनोदाहरणभाष्येत्यर्थः प्रागुक्तेति तत्पोदाहरणपरभाष्येत्यर्थः मूलादिरेवंऽपतिभाष्यविति नत्व प्रकारमेवाहकश्चेति अस्यावपूर्व
कत्वमाहेभवद्देति इति हैनावित्याहेतीति प्रहणीकरणोत्सुदित्याह आहकेणेति दृष्टांतेवैषम्यमाह अत सिलावितिइति मतसमास्तो एते
नाकजुपक्रमानुरोधादकजर्थ एव पाठः प्रत्याख्यातो न त्वलाघर्यः अन्यथा सर्वनामत्वात्तैनस्यातामितिभाष्यतात्पर्यमिति शास्त्रुक्त

मपास्तोऽपसंहारपरत्वभ्रमनिरासायाहोभयेतिननुसमुदायस्यैकत्वात्कथमिदमतआहावयवेतिसंज्ञायास्तस्याएव।अतएवपिक
ल्येपितस्यनिमित्तत्वादेवद्वंद्वंप्राचांमतेनसिद्धांतमाहार्थेतिप्राप्तेःसिद्धत्वाद्ग्रहणाभावेतिनिषेधाश्चेतिविभुत्वमूलकत्वेनोप
ज्ञीव्यादपितेवलीयांसद्वंद्वपर्वअभ्युपेत्येदंवस्तुतद्विषयएवेतिप्राचांमतेनैवाहकिंचेतिसंज्ञानोआकडारीयान्यासं।अत
एवसुबुत्पत्तेःपूर्वमेवतत्सत्वादेवनित्योतरमपिविकल्पप्रवृत्त्यापक्षेतदभावविकृष्टेःसाधुत्वेसुवोधमित्याहपूर्वेतिननुकिं
तावतातआहांतरंगेइतिनन्वेवमस्यवैयर्थ्यमतआहतदुत्तरमितिननुविषयसप्तम्यांयुगपत्प्राप्त्यापूर्वविषयत्वमतआहऽसी
तीतिअस्याःवासंज्ञायांतत्रदेशांतरमाहस्यानिवादितिननुकार्यकालपक्षेयोगपद्यमेवैत्याद्यविषयएवातआहसर्वेतिङ्कृ
तिवाध्यवाधकभावाभावेनतत्प्रवृत्त्यातत्तोविहितत्वेनकृतासिद्धरूपपेत्यर्थः।औचित्याद्येतिपाठः।अतएवअंतरंगत्वेनानिवो
हादेवमात्रेतिप्रमाणेइतिसूत्रस्येत्यादिःनन्वेवमप्यत्रदोषएवातआहद्वित्रीतिलक्ष्याभावादाहपुंस्येवेतितदाप्रायःप्रत्याः
ख्यानपरभाष्यप्राया।नचैवंमहिडोडस्येवचस्यसमुदायानुवंधत्वेनायवाननुवंधत्वात्कथंचित्कार्यमितिवाच्यंतस्तूयसूयामिपामि
त्यादितज्ज्ञापकस्यविधुषायेक्षत्वेननत्रतथांगीकारेप्यत्रतथ्यांगीकारेमानाभावात्इतिबोध्यप्राचांमतेनाहाद्देन्तादितिपःशव्द
स्यतदर्थस्य।अतएवांतएयांनगर्योमित्यपिसिद्धेकेचित्तुशोभितंतशालिदेसाहपाःतत्रअघानामध्येअर्थतःअर्थेसार्वविभक्ति राप:
कस्तासिःकेचिदितिसूचितारुचिमाहसर्वस्येतिप्रकाशप्रशाखावुक्तमस्तपाठासंगत्यायोनहस्वामीतिव्यवस्थायामितिविषयसप्त

मीत्याहानियमेनेति।अतएवाहसुमेर्विंतिलक्ष्येप्येवेतामाहदिग्वाचकेतितद्धितस्यैत्यर्थःऽदयाचलपर्यंतादिरूपोपाधेस्त
दभिधेयस्यतदाकांक्षत्वादितिभावःसंनिहितत्वादीतिएतेनदक्षिणापूर्वस्यत्रपुंवत्वेनप्राप्नोतिसमानामाकृतावभाषितपुंस्कत्वा
दाकृत्यंतरेचैतौतथादक्षिणापूर्वेतिदिकूप्राप्तैदक्षिणाःपूर्वेइतिव्यवस्थाप्राप्तौएवंतर्हिसर्वनाम्नइतिपुंवत्वमितिदिक्ष्वमेतिसूत्र
स्थभाष्यविरोधोनिरस्तःएवंचपूर्वादिप्रातिपदिकस्यैकस्यैवदिगुपाधिऽपाधिकृतभेदस्यप्रतिपादनेऽपाधिश्चपच्चीमध्यंतआंत
वर्तिनश्चत्वारःपर्वताश्चरामायणोकिष्किंधायांसुग्रीवेणमध्यदेशावधिकस्येवदिग्विभागस्योक्तेःपच्चीमध्यंचमध्यान्हसू
र्यसंयोगिदेशइतिबोध्यंतदाहेत्यत्रेतिप्रागुदग्रलावाविस्पर्थः।व्यवछेघमार्थ्यप्रसिद्धाप्रसिद्धसाधारणमाहातरमितिननुत्रिसू
त्रीप्रत्याख्यानपक्षेप्रीवदकच्चरावपिवैकल्पिकाविष्टोत्रिसूत्र्यानस्यातामतआहायमितिअर्थोपविवाएठरीधातुतेनास्येत्तित्यंत
दाहनत्वितिआदिनात्रलादिठण्हिदेसादपःविषयसप्तम्याचिकीर्षितेइतिलभ्यतइतिनचातथासतितद्विषयत्वस्यसमुदायपए
वसत्वेननत्रेवानिषेधापत्तोविप्रयविभ्रायेत्यादिलक्ष्यसंभवेपिलब्धपित्तकइत्यादिमलोकलक्ष्याछेदापतेरतआहचिकीर्षितइ
ति।सिद्धांतस्यवक्ष्यमाणत्वादाहप्राचीनेतितदाशयमाहनेदमितिसूत्रेसूत्सप्तम्यावहुव्रीहोकर्तुमिष्टेसतिसर्वादेःसर्वनामत्वनेत्यर्थ
लाभार्थमेवसमुदायस्यषष्ठत्वेनवहुव्रीहिरितिवाच्येनवहुव्रीहावितिग्रहणादैर्थ्यइतिभावःसूत्रवैयर्थ्यंतन्मतेआहनचेतितत्रैकेतिएको
पस्थितिनियामकसमुदायपरणेरहार्थोतेयेपिततोबोधस्यकस्याप्यभावेनप्रधानार्थविशिष्टविशेषणार्थबोधकत्वरूपोपसर्ज

नत्वस्यात्राविवक्षितस्याभावेनेत्यर्थः अलौकिके इति व्याख्यायां वीजमाह लौकिके त्विति नन्वेवं अतिक्रांतइति वाक्योक्तो दृष्ट्याऽत आहानिक्रांतइ
ति नन्वेवमप्यकृतेत्यनयात्र नेति सूत्रवैयर्थ्यमेवात आहाकृतेति स्वरःस्वांगाकृपमिति प्रत्यंगं प्रत्ययवर्णे पूर्वत्र परत्र वाऽसंख्यायमिति कि
याविशेषणं संख्यायाविति पाठांतरं भाष्योक्तेरिति गोनर्दीय आहेति प्राग्युक्तेरिति भावः ध्वनितमिति तत्र हि किमर्थमलुग्विधीयते वस्य लोप
वाल्हित्यापूर्वकालेऽह्नो येतस्य स्यादिति वलेनतेन प्रतिवंधान्त्रासलघपधगुणाभावार्थमलुग्विधानं न च वलोपे पिन धात्विति गुणनिषेध
सिद्ध इति वाच्यं तत्प्रत्याख्याने गुणप्राप्तेरित्युक्तं एवं च तत्सूत्रभाष्योभयमूलकमेवेदं ते नसूत्रमतात्प्रत्याख्यानवादिमतं प्रवलमिति प्र
त्याख्यानवादिसंमतत्वस्यमेवकथं चित्सूत्रमतेपि साध्यं न तु विपरीतं स तिसंमवेदिति सूत्रतस्त्वदसंभवे सूत्रमप्रमाणमेवति प्रत्याख्या
ते सूत्रसंमतमिति च वत्सुषुये ध्वनितं तदाग्रह्यमित्यादिना कृत्खंडितप्राचीनऋषिवाक्यानामप्रामाण्यवत्सूत्रकारवचः खंडनप्रवृत्तभा
ष्यवार्तिकवचनैःसर्वांगुतले हाद्धसूत्रेभाष्यविरोधापत्यातदं शोसूत्रकारवचसोपि अरष्टार्थसाधनेतत्र तत्रायानीयेतुभवतीति
भाष्योक्त्याप्रामाण्यस्त्वेपिदृष्टार्थसाधने अप्रामाण्यकल्पने वीचिताकिंचभाष्यस्यांसंदिग्धत्वेन संदिग्धार्थस्यसूत्रस्यतव्याख्ये
वीचिताकिंचेतिहासपुराणादिवेदार्थवर्णनवत्वार्तिकभाष्यादिग्रंथैःसूत्रार्थवर्णनमुचितमिति भावः एवं सतिसूत्रगतिप्रायामनु
रोधेनाहेवं चेति उत्तरमुनिप्रामाण्यवनतद्विरोधे चेत्यर्थः सिद्धांतमतेनतामाहयद्धेति तस्य उपसर्जनप्रतिषेधस्य अत्र भाष्ये संमतिमाहातृ णः
एवेति तस्य तदर्थत्वदेवेत्यर्थः तद्गुणत्वेविशेषयन्नाह प्राधान्येनेति संज्ञाग्रहणेन चतुष्टयीपक्षे आह सर्वनामपदे तितत्र विशिष्टमध्ये

एतेनेत्यस्यार्थमाहैकपदेऽपीति ननूक्तसर्वार्थवाचकत्वं कथं तदंतेऽत आह तदंते इति अवयववाचिष्ठसर्वार्थवाचकत्वस्य समुदाये आरो
पःउपसर्जनेतु तस्यैव न तत्वमिति न तदारोप इति भावः उक्तदोषद्वयाभावादाह तेनेति अन्वर्थसंज्ञाश्रित्येत्यर्थः तस्यार्थमाह तद्
नेति उक्तसर्वादेशायाहकेचित्विति प्रांचइत्यर्थः एकस्य एकवोध्यस्य योग्यार्थस्य एवमग्रेपि अत्रात्यादिकृतगौरवादाह परंत्विति
आद्यः विशिष्टविशिष्टपक्षः सतिवैशिष्ट्ये तात्वोधपुटव्यापारस्य हेतुत्वेपि महासंज्ञाकरणस्याहेतुत्वादाह तदनुमानादिति संतिवैशिष्ट्यानुमा
नादित्यर्थः कृत्रिमोपसर्जनस्यैव ग्रहणमितिभ्रमनिरासायाहात्रेति वार्तिके इत्यर्थः अत्रेत्यस्य मेवविवक्षितमिति भावः नन्वेवं तदो
ःसःसाविति सूत्रभाष्यविरोधः ततोहि कृत्रिमोपसर्जने एवविशेषप्रतीतेरन्यथासिद्धांतेष्युपसर्जनत्वात्त्वसत्वयोरप्राप्तावि ष्यत इत्युक्त
रसंगतैवस्यादत आह तदोरिति अदस एवेति अनंत्ययोरितिनवाच्यं तदोः संसौतत अदसः अनपमार्थमिदं इत्यादिः प्रकृतेति महासंज्ञया
वार्तिकप्रत्याख्यानपरेत्यर्थः नत्सूत्रेति नञ्समासस्य पूर्वपदार्थप्राधान्येऽसद्दत्याद्यावत्वसत्वयोरनापत्तिपरेत्यर्थः प्राचोक्तमसंगत
मिति ध्वनयन्नाह द्वंद्वे चेतीति सूत्रेत्येतितद्विषयन वहुव्रीहाविन्यनत्साहचर्यमाचेत्यपि वोध्यं खंडनकृदुक्तिंखंडयितुमाह किंचेति मा
त्रपदेन समुदायव्याहृतिः तदापायोभावप्रकाशप्रतिपादितसत्तेएववोध्यः निषेधइति प्रयोजनमिति येन विधिरिति सूत्रभाष्यप्रामा
ण्येनतदंतविधाविति शेषः तथा च भाष्यप्रयोगसामर्थ्यात्तदभावकल्पनापेक्षया सपक्षएवोचितइतिभावः॥नन्वनेनानिषेधात स्यस
र्वार्थवाचकत्वमेव नात आह तस्येति सर्वार्थवाचकत्वस्येत्यर्थः लोकव्युत्पत्तिसिद्धस्यतस्यानेननिषेद्धुमशक्यत्वादितिभावः॥यत्तुत्व

दुनकृतसमूहमात्रनिषेधेष्वेवेदं द्वन्द्वश्चेत्येवकाचैसप्तमीनिर्देशसामर्थ्यात्तात्पर्यतोऽधिनोऽधिकरणत्वविवक्षया समस्तमपि बहुलस्य
संस्कारानुरोधादिद्विघमानानीतं च्याहारेण बहुवचनस्य समूहावयवाभिप्रायत्वेन सर्वादीनीत्यस्य गौरवापादनं वयानिष्फलत्वाच्चानु
तुष्टत्पासमुदायस्यावयवानां च निषेधः तयोर्मध्ये समुदायस्यैवपदेशिवन्न्यायेन निषेधः आधाराधेयभावेऽपि व्यपदेशिवन्न्यायस्य
तुल्यसूत्रभाष्यदेशस्पष्टत्वात् तत्फलं च तत्रावयवस्वर्वनामत्वप्रयुक्तापि नाकजितीतितत् पंडयति अवयवस्येति फलाभावइति
रकपाहेन समासेऽतिभवकानित्यादाविवतच्छूवणस्य तु वीरत्वादिति भावः मनोरमायुक्तं खंडयति नचेति समाहारेऽवेतरेतरयोगे
पि साहित्यस्य विशेष्यत्वेति सिद्धांते नाहदेद्वावयवेति एकार्थीभावव शादिति भावव शादिति भावः ननु समुदायेतद्विवक्षासंभवएवात
आह समुदायेइति एवं चापूर्वकेवायुक्तेति भावः अतएव अवयवनिषेधे फलाभावात् दुवस्त्वे इति पूर्वोन्वयितदेवाहकृतानवेतितत्र दोषां
तरमाह लवदधरेति प्राचीनोक्तं खंडयति एतेनेति अस्यार्थमाह फलेति अस्यावयवपुष्कलमाहत्रसाधारइतितेनफलाभावादवयवनिषे
धाभावेतत्साहचर्येणार्थाधिकारानुरोधेन चास्याप्यवयवनिषेधकत्वाभावइति भावः॥ नन्वेवमुक्तरीत्या सूत्रवैयर्थ्यमत आह अहीन्यहते
तिइतरेतरद्वंद्वोदाहरणादिति भावः अतएव तत्रातस्यविशेष्यते पार्वर्तिपदार्थस्योपसर्जनत्वादेवस्तु वेइतिभाष्योदुतिप्रोषः साधकांतरमप्प
न्यत्रस्फुटं समुदायकुत्साविवक्षायां केतुनविकल्पद्वंद्वस्य सर्वाद्यंतत्वाभावात्परश्चेत्यनेनतस्यापिद्वंद्वावयवत्वेनोधनात्तत्रस रामः
विषयतायां द्वंद्वोत्तरमेवसत्वेन तत्सीतिविषयसप्तमीत्यपि वक्तुं मशक्यमेतेन मंदोक्तमपास्तमिति स्पष्टं भावप्रकाशेतदाहेतिदिशिति

उक्तप्राये नाह समुदायेति असंभवादिति प्राप्त्यभावे न निषेधासंभवादित्यर्थः॥ अस्य फलमाह तदंतादिति। पररूपफलमाह तेनेति अ
न्यथा त्वार्थवत्त्वसत्त्वाद्दोषापत्तिरेवेति भावः॥ नन्वेवं जरसा विधानादावादेशे न स्यात् विभक्तेरजरूपत्वेनाजादित्वाभावादत आह जरसा
विति व्यपेति एवं चाघेनवस्त्वेनकार्यं दूरमेव ध्वनयितुमिहतदंतपन्यासः ननु जरणयाअपहुंडे वास्तु किं जरसादेशविधानेनात
आह अतीति अर्धमात्रालाघवे सत्यपि तस्यासार्वत्रिकत्वं ततोऽस्य बलवत्त्वं च एतेन जरणयाद्यातत्करोतीति णिचि टिलोपे क्विपि णि
लोपे एकदेशविकृतन्यायेन जराप्राप्तत्वात्तत्र दोषापत्या सनकृतः णिलोपस्यासिद्धत्वेन तु नक्लोलुप्तमिति निषेधात् अत्र चास्याश्र
यणोऽभिव्यक्तेति न्यायाश्रयणो च जरसादेशकरणमेव मानमिति प्राचीदेश्याद्युक्तमपास्तं मूलप्रेपि ल्यातक्लोलुप्तमित्यस्यासा
र्वत्रिकत्वात् अभिव्यक्तेत्यनेन तत्रादोषाच्चेति दिक्॥ कृपिनविधिरित्यस्यायं प्रपंच इति तत्रैव भाष्ये स्पष्टत्वादाह पदमिति तत्रैवोदाहरणं
तानादाहो जरोति परमानिमहानित्यस्यसिद्धं भाष्योक्तत्वादाह केवलेति सीरदेवादिप्रभृत्यसंगत्याह षष्ठीति अत्र त्येतलंघ रभाषेंदु
शेखरे गम्या पाचस्पष्टं। लौकिकप्राप्तौ वीरमाहतराइति यथावेतत्रपातत्रैव स्पष्टं ननु तेनजरप्रवृत्ते पितरप्रवृत्त्यनिर्देशमानत्वा
मावालक्ष्यमादेशो ऽत आह अनेनेति स्यानिवत्त्वत्रेत्यर्थः॥ नन्वेवं तत्र कथमेतत्प्रावृत्तिरत आह येनेति एवं यदागमा इति वोधितस्या
देशेननिवृत्त्यभावएतन्न्यायवलात् अस्यचाविप्रतिषेधवारणादित्तत्रैवस्पष्टमेवमनभ्यालोपेत्याहीनां समावेशएवनवाध्य
वाधकभावइत्यापादितत्रैवस्पष्टं तदोहेतिदिशाति ननु तदत्रैव वक्तुमुचितमत आह सत्वेप्रिति सिद्धांतमाहपूर्वेत्विति तदभावे

तिजरस भावेत्यर्थः। तस्य जरसः भाष्यावरोधायाह नपुंसके तिविशेषविहितत्वादाह लुकं बाधेनेति। एवं चानुसंनिपातेति तु अत्र भाष्यसं
मतिमप्याह ध्वनितमिति तत्र हीत्यस्योक्तत्वेऽन्वया वचनेति जरसे ति षष्ठीत्यत्रापीति पाठः। तत्र तथा सति अतिजरमिति प्रथमाद्वि
तीयासाधारणमेवेदमिति भावः। अत्र टुक्त भाष्ये अन्यथा आद्यपाठे तेन संनीतिन्यायेन एवं च तेषामाह्वाव च्छले च एवमिति पाठे
एवं सतीत्यर्थः। तद्द्वित्यर्थो वा पूर्वतो भेदमाह तेषामिति सर्वथा तत्र न प्रश्लेषवैयर्थ्यमित्याहातीतिते ध्वं औरः आपद्यत्यादीनां
ततोऽपि विशेषसिद्धं तमाह परेत्विति मात्रे कार्त्स्न्येन नुविभक्त्यादेशाएवायमेव पूर्वतो विशेषः आमीत्यस्याभावेऽन्वयः। अत्रमा
ने सूत्रयत्नाहात एवेति तस्य तथैष त्वादेवेत्यर्थः। वेष्वन्न्ये दृष्टान्तः एवं च तदृतानिरासायतः पेष्टमिति भावः। अत्र तद्धिषेधा
मकाभावाद्दाहे केति तन्मात्रवसदभिमानः भाष्यान्तरमाहैष मेवेति भाष्ये ति चेति भाष्यत्यर्थश्चेत्यर्थः। एतेनैक्करणं ज्ञापकमेवे
त्यपास्तं द्वितीयभाष्यविरोधात्तला घवाभावात्त्वनवे रित्यादि सिद्धये जरा पर्यंत स्यसत्वा च्छ्रद्कार प्रत्याख्यानेन चेदं ध्वन्यतेयोग
विभागादि क्रेशपरिहारायैव सद्दति न फलांतरकल्पनेत्यमिति वेशः कार्यः आद्दादेशविषये तु अदितिछेदे एव सूत्रतात्पर्यमिति तदाहे
त्यन्यत्रेति पूर्वत्वाद्वावित्यर्थः। प्राचां मते नमूलमिति सूचयन्नतथैव व्याचष्टे आदेशो प्रतिस्वानुरूपाइति। अर्थतो वर्णतश्चेत्यर्थः
तेन चरणादी नामन्यवाचकपादादीनां चनेति भावः। तथैवतदाशयमाहानुदात्तेति नन्वेवं येचेति सूत्रस्य वार्तिके वा ग्रहणानर्थक्यम् रामः
तत्राह येचेतिव्यवस्थितविभाषाग्रहणाय परिगणितत्वेन तद्बोधकत्वासंभवाद्गृहतत्रेति येचेति सूत्रे इत्यर्थः। तत एवाहाप इति निशानिश

योरिति मातृमात्रोरिति वत्प्रयोगाः किंचिद्वैरूप्यादर्थं मेदात्रारतीति प्रकीर्णमूलरणाच्छिद्रं स्यादयदत्यर्थः। अत्राहुः चिंत्यमिति पादायन
सिद्धान्तमाह परेत्विति अन्यथा स्वरितत्व आदेशे लेत्रबाधकमाह येचेति गत्यनुवृत्तौ वाधकांतरमाहवाकेशिष्वितीति ततः पूर्ववि
शेषस्यवह्यमाणत्वादाह पृत्सा शीति एवं मांसपृतनासानूनामिति स्यानिर्दिष्टशोपितेषामयुक्तं इति सूचयन्नाहैवमिति अन्यग्रं
थासंगतिमपि सूचयन्नाहातएवेति प्रकृतांतरत्वादेवेत्यर्थः। अत एवात्र प्रश्लेषफलाभावोऽनुपदमुक्तः उक्तं वैलक्षण्यमा
हात एवेति तत्र तदनिष्ठत्वादेवेत्यर्थः। इहेति नाग्ग्रहणं प्रत्ययाप्रत्यययोरी लुक्तेःसर्वनामस्थाने चेत्यत्रासंबुद्धाविति पर्युदा
साच्च प्रत्याहारेऽपि नटाटकारेण प्रत्यासत्तिन्यायात् औटष्टिल्सात्यार्थं त्वाच्च टाट स्तुटाड्सीत्यादेर्विशेषणार्थं स्त्रदमि प्रत्याहृत्या
ख्यति अपि नापक्षान्तरसमुच्चयः युक्तश्चायमित्याह लघुत्वादिति अत्र तु सोऽपि युक्त इति ध्वनयन् भाष्योक्तमेवाह प्रसज्येति प्रथमो
पस्थितत्वादसर्वनामस्थाने इति व्यत्यये क वचनेनपेक्ष्युदासाश्राहस्रते ति स्पीत्येववाचे आदिग्रहणसामर्थ्यात् तद्न्येषामपि
ग्रहणं ते चाविशेषात्कवेता इत्यभिप्रेत्याहादीति यथाश्रुतेक पोऽसंग्रहापत्तेराह तदन्तेष्विति एतेन यथाश्रुतमेव वदंतः शाच्छिद्रं स्या
दयः परास्ताः पञ्चसमासांतविधेरनित्यत्वान्न टजिति शिष्टान्तत्पासत्ति सूत्रादस्यात्रापितथा प्रयोगाण्णे स्तत् ध्वनयन्नाह सौत्र
त्वादिति उज्ञीणोनुक्तविशेषमाह भसंज्ञेति सूत्रविहितेत्यर्थः। यथा चैतत्तथान्यत्र स्पष्टं। मर्यादायां दृष्टासंग्रहापत्तेराह भाष्यकेति
चार्थे द्वंद्व इति सूत्रमभिव्याप्येत्यर्थः। तद्गुजरमस्यानुपयोगादिति भावः। प्रतिपतिलाघव मत्र गूढाभिसंते द्वयोर्गौरवका पूर्वेवि

कल्पस्यैवेष्टत्वादाहसावेतिनिरवेति अन्यतरस्यामित्यादिः नन्वेवं ताभ्यामेवान्यत्रेवाज्ञापितत्वाधासिद्धावि दं सूत्रं व्यर्थमत आहाभ्यामेवेतिन त्रापीत्याहान्यत्रेति अस्यैवव्याख्यातत्वेतिद्धितीये आह लौकीति अपि त्यक्तसमुच्चयेनेदं परोहाहहरणामित्याहानवेति अत एवन्य नतानिराशायाह परादेति एतेन परानवकाशाभसंज्ञापदसंज्ञां बाधत इति दं युक्तमपास्तं ननु तयोरत्राप्रवृत्तौ कथं ताभ्यामत्र व्यवस्थाऽत आह विरोधादीति आदिना सामान्यविशेषभावः भिन्नफलत्वादिति भावः आदिति भावः आदिना लौकिकन्यायः सूत्रा भावेऽनिष्टमाहायेति स्वादिष्विति बाधेन भत्वस्य सावकाशत्वादाह परयेति तदुक्तं तत्रैव प्रवृत्तेराह समेति आह इत्यहचि वाऽनुत्व तत्स्यात्त्वेननेदं इव वेत स्यान्यत्रदृष्टत्वेपि तदन्यस्यापि दृष्टत्वेन तत्स्यैवा अयरणो मानाभावश्च अनात्र दृष्टान्तरं गेत्वस्यापि ग्रह णापतिश्चेत्तिस्माभ्यामस्य प्रमाणपाद्राजन्येति निर्दिष्टत्वात पुत्येतित त्वान्नु कार्यकालपक्षे एकदेशस्थले न कथं परत्वेन व्यवस्थाऽ त आह हाकडारेति ननु सूत्रस्वलिंगसंज्ञा भपदसंज्ञाभ्यां बाध्येतानवकाशत्वादत आह भपदेति अस्याऽऽमित्यनुवर्त्यत्येत्रान्वयः यस्मा दितिसूत्रादिति भावः नन्वेवमपि पर्यायः स्यादेवं चानुवृत्तिरपि सफलाति यमवाधश्च नात आहांगेति अस्य समावेशोऽन्वयदोषां तदमुन्द्र इति पुरुषेति गुर्विति चवे प्रान्तु एतेनान्यथेपपादनं तत्रयथे पायास्तक्लिष्टत्वादस्वरितत्वाच्च पुरुषसंज्ञात्मने पदसंज्ञ योरप्युक्तसामान्यापेक्षज्ञापकात्समावेशः अन्यत्रेष्टसमावेशस्थले च पाणिनिनाकृतएवतदाहेतिदिशाति घत्वाभिव्यालोपो ण रामः रिति नलोपः प्राप्त्यपि न हलोत्यस्य बाधकत्वात एतेन नतेनलोपेरूपद्वयमितितत्वमिति पास्त्युक्तमपास्तं तद्ध्वनयन्नाह हलोति करणा

मनितेमितिपाठः एकेति शास्त्रीयेरोत्यर्थः अकृतेतितु नास्त्येव एतेनन त्समासप्रमवारणार्थमेवव्याख्यानेयुक्तंन मूलाद्युक्तमित्यन्यत्रस्पष्ट तदाहेत्यन्यत्रेशब्दरत्नादानित्यर्थः अपि सूचितेति षष्ठ्यंतरसंग्रहायाहाहत्येपिमनोमोक्तफलानामन्यथासिद्धावप्यस्याव शूपकत्वं प्र तिपादयन्नस्यासाधारणं फलमाह प्रत्येविषल्लिति अन्याप्यार्यं चमीसमासाभावे अस्यावशूपकत्वे भाष्यसंमततामित्याहातस वेति उक्तं भाष्ये इति शेषः तस्यार्थसूचयन्नाहतेनेति ऽभेग्रहणेनेत्यर्थः ऽत्यर्थेपि दृत्यर्थेन तत्र वारणेपि न तिज्झो सोस्म नो दिसिद्धो तु नापास्ति कत्वं सूचितमिति मनोरमादाविदं त्यामितिस्यष्टं प्रावृत्तौ देयतु मनोरमादिनयुक्तमेतन्नित्यादेः पंच मीसमासं विनाऽसिद्धेस्तस्मादित्यंकौष्ठधाप्यः इत्यंतोभिन्नोऽप्यःपक्षत्वित्यादिर्भिन्नः इतिहैतोनियमसूत्राणां यतोवि धेधमुखेनैवप्रवृत्तिरितिनिष्कृष्य सोतोरघाभ्यामित्येवात्रणत्वमित्याद्यार्थः तेघांविधिमुखेनप्रवृत्तिरितिपक्षेतु अऽव्य वीयेद्रुत्वेवात्रणत्वमितिद्धितीयार्थः अनित्यत्वात्प्रायेनयथास्तु तन्मूलयोजननेतु ने अनित्यत्वोक्तेरत्रानुपयोगात् टीकाग्रंथ संमतेश्चेति शास्त्रीतन्नटीकाग्रंथस्याप्युक्तत्वात् तस्यासार्वत्रिकत्वसूचनरूपप्रयोगस्यसत्वात् खंडशोऽध्याहारादिनाऽप्र क्तोतार्थकल्पनया व्याख्याने गौरवात् अक्षरमर्यादयात् थाऽप्रतीतेः विधिमुखेनेतिप्रवृत्तेः सिद्धान्तत्वेन वेपरीत्योक्तेभाष्यादिवि रुद्धत्वात् उभयतोऽपि घ पर्यंतत्र घग्रहणाव शूपकत्वेनोत्तरमात्रापत्वे हेदासंभवेन निहें शासंगत्यापत्या रघाभ्यामित्यत्रानिर्दिष्ट वि कलपरिभाषोपस्थितौ मानाभावेनतथासत्यतिप्रसंगापत्यातथाव्याख्याने फलाभावेनव्यवायेपीत्यस्यावशूपकत्वे नाघा

र्थो सं मवाच्चएतेन छ त्वाविधपत्वप्रदर्शकं पूर्वस्मादपीतिनिर्दिष्टविकल्पपरिभाषोपस्थिताविहेवसूत्रेग्रहणं लिंगमतएवव्यवा
येपीतिनकार्यमित्यपितदुक्तमपास्तं दुक्तयुक्तेः व्यवायेपीतियोगविभागेननियमप्राप्तिपादकभाष्यविरोधापत्तेश्चेतिदिक् तस्मा
दनित्यत्वापादकमूलेतदाहतुनेति अस्यपक्षस्यअत्रसेट्ग्रहणमानमितिदीक्षितोदयस्तत्वेतिध्वनयन्नाहप्रतीतीति इतीति
एतत्सजातीयत्रगदस्येतिभाष्योदेत्यर्थः तादृतिपंचमीसमासेत्यर्थः अपिसमुच्चयमेवाहातएवेतितदनित्यत्वादेवेत्यर्थः त
त्रैकेपदेोक्तिसमाधानेदूषयतिपूर्वस्मादितिस्पष्टंचेदमुद्योतेभावप्रकाशेचमूलासंगतिमाहकेचित्विति विभादितेत्यादेः प्रत्येकविधित्रि
त्यादेयूक्षइत्यादेश्चसंग्रहकमाहपूर्वस्मादितिलिंगाद्वचः पूर्वत्वस्यव्यवहिताव्यवहितसाधारणत्वेपिततःपरत्वस्याव्यवहित
स्यैवग्रहणंनिर्दिष्टग्रहणाधिमानाभात् एवंचहेतोरन्यत्रनदोषइतिभावः नन्वेवमप्याघस्यकागतिरतआहप्रवीतिकेचिदि
त्यरुचिबीजंतुपूर्वस्मादित्युक्तेःसिद्धांतत्वस्यभावप्रकाशोक्तेस्पष्टत्वेपिसहायेव्यपदेशिवत्वाप्रवृत्तेःस्वविधौस्यानिव
त्वाप्रवृत्तेश्चेतितितदप्येमनित्यत्वमेवशरणमितिअतिदेशेति अचःपरेतीत्यर्थः पूर्वसूत्रेतुलिंगात्तत्रप्रवर्ततएवेत्यन्यत्र
स्पष्टं अनुवादत्वस्यसफलत्वनियतत्वादाहतत्फलंबितितदृष्टितिनिरासायाहवतीतिएकाज्झतरेतिकर्मधारयःस्थानि
वत्वंतुआघस्याशास्त्रीयत्वात् अन्येएकारत्वस्यस्वतःसत्वेप्युत्तरपदत्वस्याशास्त्रीयत्वात्पक्षद्वयेपिवर्णसमुदायमयोः रामः
स्यानित्वेनतदधर्मत्वाच्चेतिभावः योगविभागेनेतदपिसिद्धमितिप्राचोक्तंखंडयन्भाष्यासंमतत्वमाहनमुनेरितीति अतएवे

त्यस्याभयत्रान्वयः वार्तिकासंमतत्वमाहसिद्धेतिसूत्रासंमतत्वमाहनलोपइति अत्राप्रतिषिद्धमितिन्यायेनाघस्यतद्विवरणपर
तयावार्तिकस्यचनिर्वाहादिदंमतेऽक्तंभेदनिरासायाहस्यादघ्यमितिप्राचोक्तंखंडयतिशब्देनेतितदनित्यत्वानाश्रयणात्
लाघवादितितात्पर्यः अतएवप्रत्ययलेनापितसाहघ्यमितिश्चतयन्नाहासन्नमितितद्देवनिषेधानिमित्तादेवएव
सतिप्राप्तातिप्रसंगनिरासायतात्पर्यंभूतसिद्धांतमाहत्रेतिपदत्रितयत्रेत्यर्थः अन्यत्रसाटितत्रतेघुमात्रेकान्स्येतस्या
व्यवस्थापाःतदितितेषांग्रहणेत्यर्थः आधिश्वितिहोन्तकर्तृकाधिगुप्रतिश्रेषेत्यर्थः भिन्नेपदेआदिनाविभक्तिः
एतेनभाष्यविरोधेनदोषस्यकारांतस्येतिपाठःतत्रकोशूनन्वेवंननत्रप्रकारांत्येलोपप्रयोगोऽतआहतत्वेपीतिअनादेशत्वेन
भिन्नत्वेपीत्यर्थः मूलेकौमुदांवक्ष्यमाणरीतिखंडनायसिद्धांतमाहकोशेइत्यादिनन्वेवंतस्यप्रत्ययग्राहकत्वभागोऽ
तआहप्रक्तीतिएवंचतत्रतेषामर्थपरत्वेचप्रसिद्धान्यथाप्रतिग्रहविरोधपरिहरतिएतदितिनन्वेवंश्रुतिविरोधोऽतआहछे
इतिहेतुहेतुमद्भावेनान्वयइत्याहयतइतिइदमेवभाष्यसंमतमित्याहातएवेतितथावोधादेवेत्यर्थः अन्यथातथावोधो
नगीकारेणाभेदेनप्रख्यायमानतप्रतीयमानस्यहेऽघ्येतवएतातिअघ्येइत्याक्षेनिशक्तरूपाणिनामानीत्यर्थः स्पंगीकारेअ
पिनासामान्यपचनत्वेतव्याचक्षणविकलतेतिभावः नन्वेवंसर्वत्रविरूपाणामपीत्येकशेषप्राप्तिरत आहकेतिदृष्टापत्तावाह
नेकोतिअत्रसूत्रसंमतिमाहातएवेतितथातायथादेवेत्यर्थः प्राचीनमतंखंडयतिएतेनेतिऽक्तसिद्धांतविरोधेनेत्यर्थः

शब्देति वाच्यवाचकयोरभेदोपचारात्प्रसिद्धार्थपदोपस्थितार्थे नाभिदान्वय इति भावः अत एव भिन्नार्थत्वेनाप्राप्तेरेव अभेदश्च वा
च्यवाचकभावमादाय पर्यवस्यतीति कोशादेः शक्तिग्राहकतापि नासंगतेत्याहैत इति शास्त्रस्य तु न पदपरे तु प्रवृत्तिः ङ्भादित्या
दिनिर्देशात्तत्र चात्र संज्ञात्वमाधुनिकसंकेताभावात् अभिव्यक्तेति न्यायोप्यत्र न अपदकार्यत्वात् अत एव सर्वनामसंज्ञायां सं
ज्ञाप्रतिषेधो वार्तिककृतारब्धस्तदेतदभिप्रेत्याहैवं चेति शाद्बपरत्वे चेत्यर्थः अत्र कोशे अप्रस्तावत्वयः एतेनैत एवारुचेरा
सन्यामितिङ्क्ते मलेडन्त्यपास्तं तदाहेति दिशीति यत्तु पूर्वग्रहणमधिकार्थसूचनार्थं तेन सायमो मलोपः सिध्यतीति न्यासका
रस्तन्नस्पतेर्घतेति सायशब्दोऽकारान्तोऽस्मादेव लिंगादहरवसानवाचक इति हरदत्ताद्युक्तेः अत एव सायमङ्नमभिलष यत्पइ
त्यादिकाविप्रयोगा अपि तदेतत् ध्वनयन्नाह सायेभ्य इतीति एतेनतत्स्यघघ्नतत्वेन ह्रान्तेऽप्युत्तरेपदाधिकारवाधेमानाभा
वात् एवेन हलन्हीति मौलमवच्छेदः केचिन्मतमाह विभ्याषितियत्तु छन्दस्यानोमानिनि ति विच लोकेत्वन्येभ्योपीतीतिविवे
कइति ङ्डीतन्नेति ध्वनयन्नाह सचान्दते+पो लोके पीति विग्रहस्याछन्दस्त्वादाहकीत्त्वालपइति ननु तेन क्विवेव कुतो नात आ
ह क्विपस्त्विति अनतिप्रसंगायाह भाष्येति अत एव अन्यत्रात्तदनभिधानादेव एवमग्रेपि केचित् दीक्षितादयः प्राचः सिद्धांत
माहान्येइति इत्वस्य तु प्रसंग एव नात्रऽक्तभाष्यप्रयोगस्यैव सत्वेन भाष्यानुक्तक्विपत्वमापन्नात्रेति भावः। छुरस्यादिवित्यत्र भाष्येपिवि राम
वपदेन क्विवेवपूरस्या इत्याद्यावीत्वमवकाशविपुक्तेनेति गूढाक्तं तवस्याधिकृतत्वादाहचेनेवीति च नानुवृत्तिः अकरणऽलाघवा

दाहदीर्घादिति प्रथमयोरित्यत्र इति भावः यद्यपि दीक्षिताद्युक्तरीत्यापि निर्वाहस्तथापि नसा सिद्धांत इति ध्वनयन्नाह सिद्धांतमा
ह प्रत्याहारेष्विति पूर्वसवर्णदीर्घस्यत्वभावेपि तस्यास्याप्यत्वसूचनायाह ऽजसीति निषेधाच्चेति न्यायादिति भावः॥ इदमि
तिगर्भवविशेषवाचीत्यर्थः॥ इदं च प्राचां मतेनोक्तमिति सूचयन् सिद्धांतमाह परे त्विति एवं च सूत्रमतेपि सत्ताध्य एवान्यत्याफ
लभेदापत्तेरित्याह सूत्रेइति ननु प्राचोक्तमेव युक्तमस्यास्र मर्यादयाऽलाभादत आह भाष्येपि इदं पूति धातुग्रहणात् इत्य
सामान्यव्याहृत्यर्थमित्यर्थस्यास्र मर्यादयालाभेपि भाष्यवार्तिकप्रामाण्यात्तदन्यविशेषव्यावृत्त्यर्थं ननु तथेति सूत्रकृदभिमत
मित्यर्थः॥ नन्वेवमप्यावेताशचारक्किवादौ सूत्रवार्तिकयोर्भिन्नोविरोध एवात आहावं नादिति यदभावज्ञापने नोपपत्तिस्तद
भावमात्रज्ञापनमेवोचितं नाधिकबाधज्ञापनमित्याह नक्विवेतादिति तत्रतत्प्रयोगविषयेमाष्यानरमप्यत्रसाधकमित्याह
अत एवेति तत्पार्थ्ये कल्पनस्ये वोचित्यादेवेत्यर्थः मात्रेकान्त्येसिद्धार्थमित्यस्य विधायेत्यत्रान्वयः॥ अनेन योगविभागेन इत्या
दावित्यस्य समाहितमित्यत्रान्वयः नुडागमेति शेका यामिति शेषः॥ नन्वेवं तत्र वग्रहणं व्यर्थमत आह ठञ्जीतित दाशूयः भाष्यपा
यः अत एवेत्यर्थस्य कयति अधात्विति हाहादीनामित्यर्थः तदेति भाष्येत्यापरः पूर्वाद्निनाक्तप्रत्ययस्यल्पविषत्याह अर्थकक
इदुतिपाठद्वितीयादिना तक्रोल्पप्रश्नः शानजित्यादि एतेनस्वारसिकतथाप्रयोगासत्वेनतत्साधुत्वाय तदावृष्ट ऽ७क
त्वेन निर्वाहाइति तथाच योगविभागो व्यर्थ इति भावः प्राचामते दोषांतरमाहाचारेति इतोपि पूर्वद्वितीयः पशऽर्क इति बोध्यं। अ

नुवृत्तद्दस्वग्रमितमाहयुष्मामितितन्वाकडारादित्यस्यसंज्ञाव्यवस्थापकत्वेविनाधिकारसूत्रत्वमितिमूलमयुक्तमतआहकडारादृतितत्
स्यसंज्ञाव्यवस्थापनस्यपूर्वसूत्रस्याविप्रतिषेधेसतिगमकेएवेत्याहस्पष्टतयेतिमनुत्वक्ततोऽजीतितिपमाहुणाभावेनादोषोतिआहऋत
दृतिततोस्येवोचित्यादितिभावः पदलाघवादाहयुष्मीतिनुमितिदृकोचोतितुमभावापत्ताविंत्यर्थः॥ एवमग्रेपिग्गयामादेपृष्ठपाआ
देशः सूत्रसंमतिमप्याहातएवेतितकारेतितुमतेवेधीत्यर्थः दीक्षिताघुक्तिखंडयतिआगंतुनेतिपक्षांतरेइतिभावः॥ तस्यापितु
मोपिभाष्यमतेवाधसंमवाहाहासंभवेएवेतिप्राग्वदाहघेऊीनीतिआशिवधीतिङकारादित्वस्यतत्वेनतेनालाभादित्यर्थः तथाचु
नुडापत्तिरितिभावः स्पष्टमितिइदानीमपिइत्संतकजकाएदाविंत्येवार्थइतिओडः आपद्यत्यत्रभाष्येस्पष्टंप्रवाहवेत्यत्रौ
क्तरीत्येवनिर्वाहइतिनसूपाहलिगितिसूत्रभाष्यविरोधस्तदाहेतिदिगितिदिग्॥ पूर्वनिपातप्रकदरणस्यानित्यात्वातघेरित्यादि
तिदेवपूस्यसौत्रत्वादिनोपपत्तेश्चशाखिदेश्चाप्युक्तमसदितिध्वनयन्नाहास्वरितत्वादिति॥ अनुवृत्तिः किमर्थेत्याहेडस्यामिति
पंचम्येतत्वस्योत्तरार्थमावश्यकत्वादाहघेःपरेतिआदिपूर्वासंतिध्यात्षष्ठ्येवोचितेत्याहङिप्रकृतेरितिपर्यायत्वयोरुभयत्रवोध्य
तत्वेतिमुखसुखार्थत्वेत्यर्थः अत्रसूत्रेसमतिमाहातएवेतितत्रातत्तस्तदप्रवृत्तेरेवेत्यर्थः॥ दीक्षिताघुक्तिखंडयतियदित्वि
ति॥ कथंध्वनितमित्यतआहेतिदिवइतिएवंडब्राह्मणार्थीनामधीत्वेस्यष्टचेदमितिवार्तिकसाफल्यायतत्रतेनतथोक्तं॥ नन्व राम
गस्येतिसूत्रेभाष्येकंठतउक्तेवातआहांगस्येतीतिवैपरीत्यपूर्वाकानिरासायाहश्नान्नलोपइतीतियथाचैतत्तथाऽन्यत्रस्पष्टंअ

त्रभाष्यसंमतिमाहातएवेतिएवंचोतसितलेस्वरितलार्थमित्यादिप्रकाशोक्तमयुक्तमितिवोध्यंतदाहेतिदिगितिसप्तमीबहुवचननि
रासायाहसावितीतिअलइत्यस्यफलमाहयंवस्यंततिविधेयगतत्वेनविवक्षाप्राप्ताभावाहायुक्तइतीतितत्तन्नियमानादरेबीजमाहा
तएवेतिअचिफलाभावादाहहलितिपथ्यागितिसमाहारद्वंद्वेतअन्यथापक्षपूर्वस्यपूर्वनिपातायते॥ रुप्यक्पदानीत्युचितं
विशेष्यस्यत्यपासत्वादाहस्वतीतिभेदेनोक्तेःफलमाहद्वैधातिपूर्वादिंस्यादित्यर्थस्यासंगात्यध्वनयन्नाहदीर्घादितिआरभ्येत्यस्योक्त
इतिशेषःडचितइतितिरवकाशत्वाभावेनावाधकत्वेविप्रतिपदोक्तत्वस्यपूर्वप्रवृत्तिनियामकत्वस्यस्वीकारादितिभावः॥ मूलाशु
यमाहतथापीतिसख्युर्यःसख्यस्यचेत्यादिनिर्देशादाहोक्तेतिअनुकरणोऽयःप्रकृतिकएवेतितत्स्यानिकएवेत्यर्थः सर्वेसर्वपदे
तित्यायेनेदंयथाश्रुतेप्रसक्तदोषमुद्धरतिअत्रेतिपूर्वस्यासिद्धंतत्वसूचनायाहसिद्धोतीतिविशेष्यतिपूर्वरूपविशेष्यत्वतिप्रस
क्तेरातेनपादृशाप्रसिद्धःशेषविशेष्यइत्यपातेषश्चापिकार्यकालेऽगंविशेष्यमस्त्येवतथापिसरिवशब्दभिन्नोतस्येत्येवस्या
न्नतुसख्यंतभिन्नस्येतिनञैकार्थीभावापन्नस्यसखिपूर्वस्यतेविनोचविशेषणत्वेनान्वयोयोगादितिभावः॥ भाष्यालिस्यस्यल
भ्यतइत्यत्रान्वयःघोरेवेतिङकारीत्येवेतिभावःकृतेपीतितत्वस्यत्वादितिभावः॥ लोपेपिइकारइत्यस्यतदन्तित्यत्वस्यगातित्वादाहसखी
तिपादानंसामान्यतौविशेषतोवा॥ मूलोक्तप्रेकारस्यापिभाष्यसंमतत्वेनिरासायाहख्यात्यादिदितिनन्वेवंभाष्ययोर्विरोधोऽतआह
विहितेतिअनेनसंकोचावश्यकतासूचितापतनरख्यात्यातसूत्रस्यंतादितियस्पितिचेतिसूत्रस्याभाष्योत्यर्थःएतेनख्यत्यादितिसूत्रे

भाष्यविरोधात्भाष्यमनुपगम्य मात्रपरमिति मूलयुक्तमेवेति रत्नाकरोक्तमपास्तं तत्रत्यकैयटस्योक्तप्रमाद इत्युद्योते स्पष्टं तत्
दाहेत्यलमिति। इष्टं तदिति। अन्यथा विपरीतनियमप्रभावनिष्टापत्तिवारणाय लिङ्गानुसरणे गौरवापत्तिरिति भावः। दीक्षिता
द्युक्तप्रकारस्यार्थासंगत्वादयुक्तत्वं ध्वनयन्नाह स्मृतीति। नन्वेवं कथं तैः प्रयुक्तमत आह त्रिप्रकादीति यस्य पाणस्य भाष्यसंम
तमाह यात्रेइति नन्वेवमप्यस्माकं देशे घट एवात आहास्माकमपीति तद्दत्तगंतेति स्मृत्या वेतगंतेत्यर्थः। एतत्फलमाह स्वातंत्र्ये सोति
अत एव स्मृत्या दावसाधुत्वादेव बहुच्युवै बहुपत्येत्यत्र क्रमेण सूत्रार्थमाह वर्णीति पक्षद्वये व्याह सूत्रेइति एतेन बहुचावि
डुनयोर्विपीषस्य ष्टत्वेन सिद्धान्तमाह यस्येतीति वस्तुतइत्यादि रितेरिष्टत्वेऽन्वयः व चत्वमितीति पाठः। विषयातो बहुव्री
हिः। भाष्येइति तत्राह किमित्येतत्पारप्रश्ने वर्तते परिप्रश्नश्वानिर्णीते अनिर्णीते च बहुषु सेकयोः पुनर्निर्णीतमेवेत्युक्तं ननु सू
त्रसत्वे विधिसुवच्चादीनामेव ग्रहणं स्यान्नेकादीनां तत्राह संख्येति तन्मतेऽपि बहुव्रीहिः। लक्ष्यानुरोधात्र मुख्यं सार्थत्रि
कंवीरमिति ध्वनयन्नाह कर्णेति क्वचित्तायकेमव्याहात एवेति यत्तपर्युदासस्यान्यथापि सार्थक्यादाह शूद्रेतीति तत एवान्या
पांतरसंचारमत्राह तस्मादिति शुद्धिरूढिपक्षेऽन्यायविषयतामभ्युपेत्येदं वस्तुतोऽन्वयत्वात्सेवनेत्याह किंचेति तन्न्यगमकाभा
वादाहात एवेति नन्वेवं कात्रिमेति न्यायस्य निर्विषयत्वं स्यादत आह तदिति दीक्षितग्रीहिदंस्थाद्युक्तिखंडयितुं सिद्धान्तमाह राम:
सूत्रेइति कृतामिति शेषः। नियतइत्यस्य व्याहतो योविषयपरिच्छेद...हेतुत्वाभावात् विषयपरिच्छेदकहेतुत्वोपपत्तेर्नियतत्वाभाव

दितियावत्त्रित्वादिसंख्याः व्याप्यापकस्य अत्रमानमाह तत एवेति तस्यासंख्यात्वादेवेत्यर्थः। ऽदेपूपविशेषणत्वेन वार्त्तिकक्ल
प्तसंख्याग्रहणखंडनाय भाष्योक्तपक्षचतुष्टयांतोपक्षमाहेतादिति तेषायतानेप्रकटयन् भाष्ययोरविरोधमाह पक्षेति
अन्वर्थसंज्ञापक्षेइति भावः। आपिनावहूत्वादिसमुच्चयाद्विरोधः साक्षादतत्वमाह वकाहीति अत एवातिदेशपक्षान्वर्थसंज्ञाप
क्षयोरेकफलकतानुकतिप्रादृस्य संख्यानकरणीभूतार्थविषयप्रश्नार्थकतया साक्षात्संख्यानाकरणत्ववत्परंपरया
पिनतत्वमत आह कतीतिवत्वेते संख्यानकरणीभूतार्थविषयप्रश्नार्थकतया साक्षात्संख्यानाकरणत्ववत्परंपरयापिनत
त्वमत आह कतीतिवत्वेते संख्यानकरणीभूतार्थविषयपरिमाणार्थतयातत्वेवोध्यं वस्तुतः स्वारसिकतत्वाभावादाह पद्ध
तिति घामुक्तिखंडयति एतेनेति उक्तभाष्यविरोधेनेत्यर्थः। बहुत्वेति बहुत्ववाचीत्यर्थः तत्र बहुगणग्रहणं यदि विशेषणं तत्पाते न
पूर्वे स्वीकारस्तमुद्धरति अनंतेति नतु सिद्धान्ते तयोर्ग्रहणं कुतो नाह आह संघातिचयोरिति ऽणादेरवयुसन्नत्वेनान्यासंभवाच्चे
त्यापवोध्यं तदाहेत्यलमिति अत एव तदेतस्य संज्ञा तत एव। अत एव तदनुवादेन तद्विधानादेव। एतेन संज्ञाविति निषेधात्ऽसंखेत्य
पुक्तेन च केवलस्य संज्ञाफला अग्राधिकारे तदंतविधेः सत्वेन षड्गोलकः संभवादित्यपास्तं शाकटायनमतेनाह संख्यातिकिमिति पुग्ग
ह्युक्तेरसांगत्यं सूचयन्नाह अनेकेति वक्तुरत्रसत्वेपि वोद्धुरेव पृथकमाहात्रस्येति नन्वेवमन्यान्यास्त्रयापत्तिरत आह प्रदेशेष्विति नन्वे
वमपि विशेषाविहितत्वादेतामिलोपसंज्ञावाधः स्यादत आहेकेति दीक्षिताद्युक्तेरसांगत्यस्यान्यत्र प्रतिपादितत्वात्सिद्धान्तमाह षड्भ्य

BHAU DAJI

